


हें पुस्तक मुंबईत जावजी दादाजी यांच्या
"निर्णयसागर" छापखान्यांचे मालक
तुकाराम जावजी यांनीं छापून
प्रसिद्ध केलें. शके १८१४.



दिपपापानि नाशयति कर्मणीति चेत् ॥ ६ ॥ महापापा
पपापम् ॥ ७ ॥ महापापपापपापप

चित्स्पर्शं न कुर्वंति नलिनीदलमंबुवत् ॥३॥ गीतायाः पुस्तकं यत्र यत्र पाठः प्रवर्तते॥ तत्र सर्वाणि तीर्थानि प्रयागादीनि तत्र वै ॥४॥ सर्वे देवाश्च ऋषयो योगिनः पन्नगाश्च ये ॥ गोपाला गोपिका वापि नारदोद्धवपार्षदैः ॥ ५॥ सहायो जायते शीघ्रं यत्र गीता प्रवर्तते॥ यत्र गीताविचा

रश्च पठन पाठन श्रुतम् ॥ तत्राहं निश्चि
तं पृथ्वि निवसामि सदैव हि॥६॥ गीताश्र
येऽहं तिष्ठामि गीता मे चोत्तमं गृहम्॥
गीता ज्ञानमुपाश्रित्य त्रींल्लोकान्पाल
याम्यहम्॥७॥ गीता मे परमा विद्या ब्र
ह्मरूपा न संशयः।अर्धमात्राक्षरा नित्या
स्वानिर्वाच्यपदात्मिका॥८॥ चिदानंदे

नकृष्णेनप्रोक्तास्वमुखतोऽर्जुनम् ॥ वेद त्रयी परानंदा तत्त्वार्थज्ञानसंयुता ॥९॥ योऽष्टादशजपो नित्यं नरो निश्चलमानसः ॥ ज्ञानसिद्धिं स लभते ततो याति परं पदम् ॥ १० ॥ पाठेऽसमग्रेसंपूर्णेततोऽर्धं पाठमाचरेत् ॥ तदा गोदानजं पुण्यं लभतेनात्रसंशयः ॥ ११ ॥ त्रिभागं पठमानस्तु

गंगास्नानफलंलभेत्। षडंशंजपमानस्तु
सोमयागफलंलभेत्॥ १२॥ एकाध्यायं
तुयोनित्यंपठतेभक्तिसंयुतः॥रुद्रलोक
मवाप्नोतिगणोभूत्वावसेच्चिरम्॥ १३॥
अध्यायंश्लोकपादंवानित्यंयः पठतेन
रः॥सयातिनरतांयावन्मन्वंतरंवसुंधरे
॥१४॥गीतायाः श्लोकदशकंसप्तपंचच

तुष्टयम्॥ द्वौ त्रीनेकं तदर्धं वा श्लोकानां
यः पठेन्नरः॥१५॥चंद्रलोकमवाप्नोति व
र्षाणामयुतंध्रुवम्॥गीतापाठसमायुक्तो
मृतोमानुषतांव्रजेत्॥१६॥गीताभ्यासं
पुनः कृत्वा लभते मुक्तिमुत्तमाम्॥गीते
त्युच्चारसंयुक्तो म्रियमाणो गतिं लभेत्
॥१७॥ गीतार्थश्रवणासक्तो महापापयु

तापे वा॥वैकुंठं समवाप्नोति विष्णुनास
ह मोदते॥१८॥गीतार्थं ध्यायते नित्यं कृ
त्वा कर्माणि भूरिशः॥जीवन्मुक्तः स वि
ज्ञेयो देहांते परमं पदम् ॥१९॥ गीतामा
श्रित्य बहवो भूभुजो जनकादयः॥निर्धू
तकल्मषा लोके गीता याताः परं पदम्
॥२०॥गीतायाः पठनं कृत्वा माहात्म्यं

नैव यः पठेत् ॥ वृथा पाठो भवेत्तस्य श्रम एव ह्युदाहृतः ॥२१॥ एतन्माहात्म्यसं युक्तं गीताभ्यासं करोति यः ।स तत्फलम वाप्नोति दुर्लभां गतिमाप्नुयात्॥२२॥सू त उवाच॥ माहात्म्यमेतद्गीताया मया प्रोक्तं सनातनम्॥गीतांते च पठेद्यस्तु य दुक्तं तत्फलं लभेत् ॥ २३ ॥

इति श्रीवाराहपुराणे श्रीगीतामाहात्यं संपूर्णम् ॥

श्रीगणेशाय नमः ॥ श्रीगोपालकृष्णाय
नमः ॥ ॐ अस्य श्रीभगवद्गीतामाला
मंत्रस्य भगवान्वेदव्यास ऋषिः ॥ अ
नुष्टुप् छंदः ॥ श्रीकृष्णः परमात्मा दे
वता ॥ अशोच्यानन्वशोचस्त्वं प्रज्ञा
वादांश्च भाषस इति बीजम् ॥ सर्वध
र्मान्परित्यज्य मामेकं शरणं व्रजेति

शक्तिः ॥ अहं त्वा सर्वपापेभ्यो मोक्ष
यिष्यामि माशुच इति कीलकम् ॥ नै
नं छिंदंति शस्त्राणि नैनं दहति पावक
इत्यंगुष्ठाभ्यां नमः ॥ न चैनं क्लेदयंत्या
पो न शोषयति मारुत इति तर्जनीभ्यां
नमः ॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्यो
ऽशोष्य एव चेति मध्यमाभ्यां नमः ॥

नित्यःसर्वगतःस्थाणुरचलोऽयं सनात
न इत्यनामिकाभ्यां नमः ॥ पश्य मे
पार्थ रूपाणि शतशोऽथ सहस्रश इति
कनिष्ठिकाभ्यां नमः ॥ नानाविधानि
दिव्यानि नानावर्णाकृतीनि चेति कर
तलकरपृष्ठाभ्यां नमः ॥ इति करन्या
सः ॥ अथ हृदयादिन्यासः ॥ नैनं छिं

दंति शस्त्राणि नैनं दहति पावक इति हृदयाय नमः ॥ न चैनं क्लेदयंत्यापो न शोषयति मारुत इति शिरसे स्वाहा ॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव चेति शिखायै वषट् ॥ नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन इति कवचाय हुम् ॥ पश्य मे पार्थ रूपाणि

शतशोऽथ सहस्रश इति नेत्रत्रयाय वौ
षट् ॥ नानाविधानि दिव्यानि नानाव
र्णाकृतीनि चेति अस्त्राय फट् ॥ श्रीकृ
ष्णप्रीत्यर्थे पाठे विनियोगः ॥ ॐ पार्था
य प्रतिबोधितां भगवता नारायणेन
स्वयं व्यासेन ग्रथितां पुराणमुनिना म
ध्येमहाभारतम् ॥ अद्वैतामृतवर्षिणीं

भगवतीमष्टादशाध्यायिनीमंब त्वाम
नुसंदधामि भगवद्गीते भवद्वेषिणीम्
॥ १ ॥ नमोऽस्तु ते व्यास विशालबुद्धे
फुल्लारविंदायतपत्रनेत्र ॥ येन त्वया
भारततैलपूर्णः प्रज्वालितो ज्ञानमयः
प्रदीपः ॥ २ ॥ प्रपन्नपारिजाताय तो
त्रवेत्रैकपाणये ॥ ज्ञानमुद्राय कृष्णाय

गीतामृतदुहे नमः ॥ ३ ॥ सर्वोपनिष
दो गावो दोग्धा गोपालनंदनः ॥ पार्थो
वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं मह
त् ॥ ४ ॥ वसुदेवसुतं देवं कंसचाणूरम
र्दनम् ॥ देवकीपरमानंदं कृष्णं वंदे ज
गद्गुरुम् ॥ ५ ॥ भीष्मद्रोणतटा जयद्र
थजला गांधारनीलोपला शल्यग्राहव

ती कृपेण वहनी कर्णेन वेलाकुला ॥ अश्वत्थामविकर्णघोरमकरा दुर्योधना वर्तिनी सोत्तीर्णा खलु पांडवै रणनदी कैवर्तकः केशवः ॥ ६ ॥ पाराशर्यवचः सरोजममलं गीतार्थगंधोत्कटं नाना ख्यानककेसरं हरिकथासंबोधनाबो धितम् ॥ लोके सज्जनषट्पदैरहरहः पे

ध्यानाधिरूढं गुरुगीयमानं मार्गं ॥ ध्यानाधिरूढं
तिं दिशंतं मोक्षमार्गपदकंमलानि ॥
॥ ७ ॥ वंदे ब्रह्मा वरुणेंद्ररुद्रमरुतः स्तुन्वं
यत्कृपा तमहं वंदे परमानंदमाधवम् ॥
गीतं वाचालं पंगुं लंघयते गिरिम् ॥
मूकं करोति वाचालं तमहं वंदे परमानंदमाधवम् ॥
॥ ८ ॥ मूकं करोति वाचालं पंगुं लंघयते गिरिम् ॥
मत्प्रसंगेन नः श्रेयस्स्यात्सर्वत्र सर्वदा ॥
पीयमानं मुहुर्मुग्धैरतृपंकर्णपुटैरहो ॥

ततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ ९ ॥ इति ध्यानम् ॥ धृतराष्ट्र उवाच ॥ धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ॥ मामकाः पांडवाश्चैव किमकुर्वत संजय ॥ १ ॥ संजय उवाच ॥ दृष्ट्वा तु पांडवानीकं व्यूढं दु

र्योधनस्तदा ॥ आचार्यमुपसंगम्य रा
जा वचनमब्रवीत् ॥२॥ पश्यैतां पांडु
पुत्राणामाचार्य महतीं चमूम् ॥ व्यूढां
द्रुपदपुत्रेण तव शिष्येण धीमता ॥३॥
अत्र शूरा महेष्वासा भीमार्जुनसमा
युधि ॥ युयुधानो विराटश्च द्रुपदश्च म
हारथः ॥ ४ ॥ धृष्टकेतुश्चेकितानः का

शिराजश्च वीर्यवान् ॥ पुरुजित्कुंतिभो
जश्च शैब्यश्च नरपुंगवः ॥ ५ ॥ युधाम
न्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् ॥
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः
॥ ६ ॥ अस्माकं तु विशिष्टा ये तान्निबो
ध द्विजोत्तम ॥ नायका मम सैन्यस्य
संज्ञार्थं तान्ब्रवीमि ते ॥ ७ ॥ भवान्भी

ष्मश्च कर्णश्च कृपश्च समितिंजयः ॥ अ
श्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च
॥८॥ अन्ये च बहवः शूरा मदर्थे त्यक्त
जीविताः ॥ नानाशस्त्रप्रहरणाः सर्वे यु
द्धविशारदाः ॥ ९ ॥ अपर्याप्तं तदस्मा
कं बलं भीष्माभिरक्षितम् ॥ पर्याप्तं
त्विदमेतेषां बलं भीमाभिरक्षितम्

॥१०॥ अयनेषु च सर्वेषु यथाभागमव
स्थिताः ॥ भीष्ममेवाभिरक्षंतु भवंतः
सर्व एव हि ॥ ११ ॥ तस्य संजनयन्हर्षं
कुरुवृद्धः पितामहः ॥ सिंहनादं विनद्यो
च्चैः शंखं दध्मौ प्रतापवान् ॥१२॥ ततः
शंखाश्च भेर्यश्च पणवानकगोमुखाः ॥
सहसैवाभ्यहन्यंत स शब्दस्तुमुलोऽभ

वत् ॥१३॥ ततः श्वेतैर्हयैर्युक्ते महति
स्यंदने स्थितौ॥ माधवः पांडवश्चैव दि
व्यौ शंखौ प्रदध्मतुः॥ १४॥ पांचज
न्यं हृषीकेशो देवदत्तं धनंजयः॥ पौं
ड्रं दध्मौ महाशंखं भीमकर्मा वृकोद
रः॥ १५॥ अनंतविजयं राजा कुंती
पुत्रो युधिष्ठिरः॥ नकुलः सहदेवश्च सु

घोषमणिपुष्पकौ ॥ १६ ॥ काश्यश्च परमेष्वासः शिखंडी च महारथः ॥ धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥ १७ ॥ द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ॥ सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक् पृथक् ॥ १८ ॥ स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ॥

नभश्च पृथिवीं चैव तुमुलो व्यनुनादय
न् ॥ १९ ॥ अथ व्यवस्थितान्दृष्ट्वा धा
र्तराष्ट्रान्कपिध्वजः ॥ प्रवृत्ते शस्त्रसंपा
ते धनुरुद्यम्य पांडवः ॥ २० ॥ हृषी
केशं तदा वाक्यमिदमाह महीपते ॥
अर्जुन उवाच ॥ सेनयोरुभयोर्मध्ये र
थं स्थापय मेऽच्युत ॥ २१ ॥ यावदेता

न्निरीक्षेऽहं योद्धुकामानवस्थितान् ॥ कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥ योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ॥ धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥ संजय उवाच ॥ एवमुक्तो हृषीकेशो गुडाकेशेन भारत ॥ सेनयोरुभयोर्मध्ये स्थाप

यित्वा रथोत्तमम् ॥ २४ ॥ भीष्मद्रोण
प्रमुखतः सर्वेषां च महीक्षिताम् ॥ उ
वाच पार्थ पश्यैतान्समवेतान्कुरूनि
ति ॥ २५ ॥ तत्रापश्यत्स्थितान्पार्थः पि
तॄनथ पितामहान् ॥ आचार्यान्मातुला
न्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥ २६ ॥
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ॥

तान्समीक्ष्य स कौंतेयः सर्वान्बंधूनव
स्थितान् ॥ २७ ॥ कृपया परयाविष्टो वि
षीदन्निदमब्रवीत् ॥ अर्जुन उवाच ॥
दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थि
तम् ॥ २८ ॥ सीदंति मम गात्राणि मु
खं च परिशुष्यति ॥ वेपथुश्च शरीरे मे
रोमहर्षश्च जायते ॥ २९ ॥ गांडीवं स्रं

सते हस्तात्त्वक्चैव परिदह्यते ॥ न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ३० ॥ निमित्तानि च पश्यामि विपरीतानि केशव ॥ न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥ ३१ ॥ न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च ॥ किं नो राज्येन गोविंद किं भोगै

जीवितेन वा ॥३२॥ येषामर्थे कांक्षि
तं नो राज्यं भोगाः सुखानि च ॥ त इ
मेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धना
नि च ॥३३॥ आचार्याः पितरः पुत्रा
स्तथैव च पितामहाः ॥ मातुलाः श्वशु
राः पौत्राः श्यालाः संबंधिनस्तथा
॥ ३४ ॥ एतान्न हंतुमिच्छामि घ्नतो

ऽपि मधुसूदन॥अपि त्रैलोक्यराज्यस्य
हेतोः किं नु महीकृते ॥ ३५ ॥ निह
त्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जना
र्दन ॥ पापमेवाश्रयेदस्मान्हत्वैतानात
तायिनः ॥ ३६ ॥ तस्मान्नार्हा वयं हं
तुं धार्तराष्ट्रान्स्वबांधवान् ॥ स्वजनं हि
कथं हत्वा सुखिनः स्याम माधव॥३७॥

गी. यद्यप्येते न पश्यंति लोभोपहतचेतसः अ.
१२ ॥ कुलक्षयकृतं दोषं मित्रद्रोहे च पात १
कम् ॥३८॥ कथं न ज्ञेयमस्माभिः पा
पादस्मान्निवर्तितुम् ॥ कुलक्षयकृतं दो
षं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥ कुलक्ष
ये प्रणश्यंति कुलधर्माः सनातनाः ॥ १२
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्यु

त ॥ ४० ॥ अधर्माभिभवात्कृष्ण प्रदु
ष्यंति कुलस्त्रियः ॥ स्त्रीषु दुष्टासु वार्ष्णे
य जायते वर्णसंकरः ॥ ४१ ॥ संकरो
नरकायैव कुलघ्नानां कुलस्य च ॥ पतं
ति पितरो ह्येषां लुप्तपिंडोदकक्रियाः
॥ ४२ ॥ दोषैरेतैः कुलघ्नानां वर्णसंकर
कारकैः ॥ उत्साद्यंते जातिधर्माः कुल

धर्माश्च शाश्वताः ॥ ४३ ॥ उत्सन्नकुलध
र्माणां मनुष्याणां जनार्दन ॥ नरके
नियतं वासो भवतीत्यनुशुश्रुम ॥ ४४ ॥
अहो बत महत्पापं कर्तुं व्यवसिता व
यम् ॥ यद्राज्यसुखलोभेन हंतुं स्वजन
मुद्यताः ॥ ४५ ॥ यदि मामप्रतीकार
मशस्त्रं शस्त्रपाणयः ॥ धार्तराष्ट्रा रणे

हन्युस्तन्मे क्षेमतरं भवेत् ॥ ४६ ॥ सं
जय उवाच ॥ एवमुक्त्वाऽर्जुनः संख्ये
रथोपस्थ उपाविशत् ॥ विसृज्य सशरं
चापं शोकसंविग्नमानसः॥ ४७॥ इति
श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्या
यां योगशास्त्रे श्रीकृष्णार्जुनसंवादेऽर्जु
नविषादयोगो०प्रथमोऽध्यायः ॥ १ ॥

॥ संजय उवाच ॥ ॥ तं तथा कृप
याविष्टमश्रुपूर्णाकुलेक्षणम् ॥ विषीदंत
मिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥
श्रीभगवानुवाच ॥ कुतस्त्वा कश्मल
मिदं विषमे समुपस्थितम् ॥ अनार्यजु
ष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥ क्लै
ब्यं मा स्म गमः पार्थ नैतत्त्वय्युपप

द्यते ॥ क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ
परंतप ॥३॥ अर्जुन उ०॥ कथं भीष्ममहं
संख्ये द्रोणं च मधुसूदन ॥ इषुभिः प्रति
योत्स्यामि पूजार्हावरिसूदन ॥४॥ गुरू
नहत्वा हि महानुभावान् श्रेयो भोक्तुं
भैक्ष्यमपीह लोके ॥ हत्वार्थकामांस्तु
गुरूनिहैव भुंजीय भोगान्रुधिरप्रदिग्धा

न् ॥ ५ ॥ न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः ॥ या
नेव हत्वा न जिजीविषामस्तेऽवस्थि
ताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥ कार्पण्य
दोषोपहतस्वभावः पृच्छामि त्वां धर्म
संमूढचेताः ॥ यच्छ्रेयः स्यान्निश्चितं ब्रू
हि तन्मे शिष्यस्तेऽहं शाधि मां त्वां

प्रपन्नम् ॥ ७ ॥ नहि प्रपश्यामि ममा
पनुद्याद् यच्छोकमुच्छोषणमिंद्रिया
णाम् ॥ अवाप्य भूमावसपत्नमृद्धं रा
ज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥
संजय उवाच ॥ एवमुक्त्वा हृषीकेशं
गुडाकेशः परंतप ॥ न योत्स्य इति गो
विंदमुक्त्वा तूष्णीं बभूव ह ॥ ९ ॥ तमु

वाच हृषीकेशः प्रहसन्निव भारत ॥ से
नयोरुभयोर्मध्ये विषीदंतमिदं वचः
॥ १० ॥ श्रीभगवानुवाच ॥ अशोच्या
नन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ॥
गतासूनगतासूंश्च नानुशोचंति पंडिताः
॥ ११ ॥ न त्वेवाहं जातु नासं न त्वं
नेमे जनाधिपाः ॥ न चैव न भविष्या

मः सर्वे वयमतः परम् ॥ १२ ॥ देहि
नोऽस्मिन्यथा देहे कौमारं यौवनं ज
रा ॥ तथा देहांतरप्राप्तिर्धीरस्तत्र न मु
ह्यति ॥ १३ ॥ मात्रास्पर्शास्तु कौंतेय
शीतोष्णसुखदुःखदाः ॥ आगमापायि
नोऽनित्यास्तांस्तितिक्षस्व भारत॥१४॥
यं हि न व्यथयंत्येते पुरुषं पुरुषर्षभ॥स

मदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५ ॥ नासतो विद्यते भावो नाभावो विद्यते सतः ॥ उभयोरपि दृष्टोंऽतस्त्वनयोस्तत्त्वदर्शिभिः ॥ १६ ॥ अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ॥ विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ १७ ॥ अंतवंत इमे देहा नि

त्यस्योक्ताः शरीरिणः ॥ अनाशिनो
ऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥१८॥
य एनं वेत्ति हंतारं यश्चैनं मन्यते हत
म् ॥ उभौ तौ न विजानीतो नायं हं
ति न हन्यते ॥ १९ ॥ न जायते म्रिय
ते वा कदाचिन्नायं भूत्वा भविता वा
न भूयः ॥ अजो नित्यः शाश्वतोऽयं पु

राणो न हन्यते हन्यमाने शरीरे ॥२०॥
वेदाविनाशिनं नित्यं य एनमजमव्यय
म् ॥ कथं स पुरुषः पार्थ कं घातयति
हंति कम् ॥ २१ ॥ वासांसि जीर्णानि
यथा विहाय नवानि गृह्णाति नरोऽप
राणि ॥ तथा शरीराणि विहाय जीर्णा
न्यन्यानि संयाति नवानि देही ॥२२॥

नैनं छिंदंति शस्त्राणि नैनं दहति पाव
कः ॥ न चैनं क्लेदयंत्यापो न शोषयति
मारुतः ॥ २३ ॥ अच्छेद्योऽयमदाह्यो
ऽयमक्लेद्योऽशोष्य एवच ॥ नित्यः सर्व
गतः स्थाणुरचलोऽयं सनातनः॥ २४॥
अव्यक्तोऽयमचिंत्योऽयमविकार्योऽय
मुच्यते ॥ तस्मादेवं विदित्वैनं नानु

शोचितुमर्हसि ॥ २५ ॥ अथ चैनं नि
त्यजातं नित्यं वा मन्यसे मृतम् ॥ त
थापि त्वं महाबाहो नैनं शोचितुमर्ह
सि ॥ २६ ॥ जातस्य हि ध्रुवो मृत्यु
र्ध्रुवं जन्म मृतस्य च ॥ तस्मादपरिहा
र्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥ अव्य

क्तादीनि भूतानि व्यक्तमध्यानि भार

त ॥ अव्यक्तनिधनान्येव तत्र का परि
देवना ॥ २८ ॥ आश्चर्यवत्पश्यति क
श्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ॥
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्ये
नं वेद न चैव कश्चित् ॥ २९ ॥ देही
नित्यमवध्योऽयं देहे सर्वस्य भारत ॥
तस्मात्सर्वाणि भूतानि न त्वं शोचितु

103737

मर्हसि ॥ ३० ॥ स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि॥ धर्म्याद्धि युद्धाच्छ्रे योऽन्यत्क्षत्रियस्य न विद्यते ॥ ३१ ॥ यदृच्छया चोपपन्नं स्वर्गद्वारमपावृत म् ॥ सुखिनः क्षत्रियाः पार्थ लभंते यु द्धमीदृशम् ॥ ३२ ॥ अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ॥ ततः स्व

धर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥ अकीर्तिं चापि भूतानि कथयिष्यंति तेऽव्ययाम् ॥ संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ ३४ ॥ भयाद्रणादुपरतं मंस्यंते त्वां महारथाः ॥ येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥ ३५ ॥ अवाच्यवादांश्च

बहून्वादिष्यंति तवाहिताः ॥ निंदंत
स्तव सामर्थ्यं ततो दुःखतरं नु किम्
॥ ३६ ॥ हतो वा प्राप्स्यसि स्वर्गं जि
त्वा वा भोक्ष्यसे महीम् ॥ तस्मादुत्ति
ष्ठ कौंतेय युद्धाय कृतनिश्चयः ॥ ३७॥
सुखदुःखे समे कृत्वा लाभालाभौ ज
याजयौ ॥ ततो युद्धाय युज्यस्व नैवं पा

पमवाप्स्यसि ॥ ३८ ॥ एषा तेऽभिहि
ता सांख्ये बुद्धिर्योगे त्विमां शृणु ॥ बु
द्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्य
सि ॥ ३९ ॥ नेहाभिक्रमनाशोऽस्ति प्र
त्यवायो न विद्यते ॥ स्वल्पमप्यस्य ध
र्मस्य त्रायते महतो भयात् ॥ ४० ॥
व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन

॥ बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसा
यिनाम् ॥ ४१ ॥ यामिमां पुष्पितां वा
चं प्रवदंत्यविपश्चितः ॥ वेदवादरताः
पार्थ नान्यदस्तीति वादिनः ॥ ४२ ॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्र
दाम् ॥ क्रियाविशेषबहुलां भोगैश्वर्यग
तिं प्रति ॥ ४३ ॥ भोगैश्वर्यप्रसक्तानां

तयापहृतचेतसाम् ॥ व्यवसायात्मि
का बुद्धिः समाधौ न विधीयते ॥ ४४ ॥
त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवा
र्जुन ॥ निर्द्वंद्वो नित्यसत्वस्थो निर्योग
क्षेम आत्मवान् ॥ ४५ ॥ यावानर्थ उ
दपाने सर्वतः संप्लुतोदके ॥ तावान्सर्वे
षु वेदेषु ब्राह्मणस्य विजानतः ॥ ४६ ॥

कर्मण्येवाधिकारस्ते मा फलेषु कदाच
न ॥ मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्व
कर्मणि ॥ ४७ ॥ योगस्थः कुरु कर्मा
णि संगं त्यक्त्वा धनंजय ॥ सिद्ध्यसि
द्ध्योः समो भूत्वा समत्वं योग उच्य
ते ॥ ४८ ॥ दूरेण ह्यवरं कर्म बुद्धियो
गाद्धनंजय ॥ बुद्धौ शरणमन्विच्छ कृ

पणाः फलहेतवः ॥ ४९ ॥ बुद्धियुक्तो
जहातीह उभे सुकृतदुष्कृते ॥ तस्मा
द्योगाय युज्यस्व योगः कर्मसु कौश
लम् ॥ ५० ॥ कर्मजं बुद्धियुक्ता हि फलं
त्यक्त्वा मनीषिणः ॥ जन्मबंधविनि
र्मुक्ताः पदं गच्छंत्यनामयम् ॥ ५१ ॥
यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्य

ति ॥ तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥ ५२ ॥ श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ॥ समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ ५३ ॥ अर्जुन उवाच॥ स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ॥ स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ ५४ ॥

श्रीभगवानुवाच ॥ प्रजहाति यदा का
मान्सर्वान्पार्थ मनोगतान् ॥ आत्म
न्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते
॥ ५५ ॥ दुःखेष्वनुद्विग्नमनाः सुखेषु
विगतस्पृहः ॥ वीतरागभयक्रोधः स्थि
तधीर्मुनिरुच्यते ॥ ५६ ॥ यः सर्वत्रान
भिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ॥ ना

भिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठि
ता ॥ ५७ ॥ यदा संहरते चायं कूर्मोऽ
ऽगानीव सर्वशः ॥ इंद्रियाणींद्रियार्थे
भ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥ वि
षया विनिवर्तंते निराहारस्य देहिनः ॥
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते
॥ ५९ ॥ यततो ह्यपि कौंतेय पुरुषस्य

विपश्चितः ॥ इंद्रियाणि प्रमाथीनि हरं
ति प्रसभं मनः ॥ ६० ॥ तानि सर्वाणि
संयम्य युक्त आसीत मत्परः ॥ वशे हि
यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता
॥ ६१ ॥ ध्यायतो विषयान्पुंसः संगस्ते
षूपजायते ॥ संगात्संजायते कामः का
मात्क्रोधोऽभिजायते ॥६२॥ क्रोधाद्

वति संमोहः संमोहात्स्मृतिविभ्रमः ॥ स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥ रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् ॥ आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥ प्रसादे सर्वदुःखानां हानिरस्योपजायते ॥ प्रसन्नचेतसो ह्याशु बुद्धिः पर्य

वतिष्ठते ॥ ६५ ॥ नास्ति बुद्धिरयुक्तस्य
न चायुक्तस्य भावना ॥ न चाभावय
तः शांतिरशांतस्य कुतः सुखम् ॥ ६६ ॥
इंद्रियाणां हि चरतां यन्मनोऽनुविधी
यते ॥ तदस्य हरति प्रज्ञां वायुर्नावमिवां
भसि ॥ ६७ ॥ तस्माद्यस्य महाबाहो
निगृहीतानि सर्वशः ॥ इंद्रियाणींद्रिया

र्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८ ॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमी ॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ ६९ ॥ आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत् ॥ तद्वत्कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी ॥ ७० ॥ विहाय

कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ॥ निर्ममो निरहंकारः स शांतिमधिगच्छति ॥७१॥ एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ॥ स्थित्वाऽस्यामंतकालेऽपि ब्रह्म निर्वाणमृच्छति ॥ ७२॥ इति श्रीमद्भगवद्गीतासूप० सांख्ययोगो नाम द्वितीयोऽध्यायः ॥ २॥

अर्जुन उवाच ॥ ज्यायसी चेत्कर्मण
स्ते मता बुद्धिर्जनार्दन ॥ तत्किं कर्म
णि घोरे मां नियोजयसि केशव॥ १॥
व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव
मे ॥ तदेकं वद निश्चित्य येन श्रेयोऽह
माप्नुयाम् ॥ २ ॥ श्रीभगवानुवाच ॥
लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता

मयानघ॥ ज्ञानयोगेन सांख्यानां कर्म
योगेन योगिनाम् ॥ ३ ॥ न कर्मणाम
नारंभान्नैष्कर्म्यं पुरुषोऽश्नुते ॥ न च
संन्यसनादेव सिद्धिं समधिगच्छति
॥ ४ ॥ नहि कश्चित्क्षणमपि जातु ति
ष्ठत्यकर्मकृत् ॥ कार्यते ह्यवशः कर्म
सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥ कर्मेंद्रिया

णि संयम्य य आस्ते मनसा स्मरन् ॥ इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ६ ॥ यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन ॥ कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ७ ॥ नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ॥ शरीरयात्रापि च ते न प्रसिद्ध्येद

कर्मणः ॥ ८ ॥ यज्ञार्थात्कर्मणोऽन्यत्र
लोकोऽयं कर्मबंधनः ॥ तदर्थं कर्म कौं
तेय मुक्तसंगः समाचर ॥ ९ ॥ सहय
ज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ॥
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टका
मधुक् ॥ १० ॥ देवान्भावयतानेन ते
देवा भावयंतु वः ॥ परस्परं भावयंतः

श्रेयः परमवाप्स्यथ ॥ ११ ॥ इष्टान्भो
गान्हि वो देवा दास्यंते यज्ञभाविताः ॥
तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव
सः ॥ १२ ॥ यज्ञशिष्टाशिनः संतो मु
च्यंते सर्वकिल्बिषैः ॥ भुंजते ते त्वघं पा
पा ये पचंत्यात्मकारणात् ॥ १३ ॥ अ
न्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः ॥

यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भ
वः ॥ १४ ॥ कर्म ब्रह्मोद्भवं विद्धि ब्रह्मा
क्षरसमुद्भवम् ॥ तस्मात्सर्वगतं ब्रह्म नि
त्यं यज्ञे प्रतिष्ठितम् ॥ १५ ॥ एवं प्रव
र्तितं चक्रं नानुवर्तयतीह यः ॥ अघा
युरिंद्रियारामो मोघं पार्थ स जीवति
॥ १६ ॥ यस्त्वात्मरतिरेव स्यादात्मतृ

स्त्रश्च मानवः ॥ आत्मन्येव च संतुष्टस्त
स्य कार्यं न विद्यते ॥ १७ ॥ नैव तस्य
कृतेनार्थो नाकृतेनेह कश्चन ॥ न चास्य
सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥
तस्मादसक्तः सततं कार्यं कर्म समाच
र ॥ असक्तो ह्याचरन्कर्म परमाप्नोति
पूरुषः ॥ १९ ॥ कर्मणैव हि संसिद्धिमा

स्थिता जनकादयः ॥ लोकसंग्रहमेवा
पि संपश्यन्कर्तुमर्हसि ॥ २० ॥ यद्यदा
चरति श्रेष्ठस्तत्तदेवेतरो जनः ॥ स यत्प्र
माणं कुरुते लोकस्तदनु वर्तते ॥ २१ ॥
न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु
किंचन ॥ नानवाप्तमवाप्तव्यं वर्त एव
च कर्मणि ॥ २२ ॥ यदि ह्यहं न वर्ते

यं जातु कर्मण्यतंद्रितः ॥ मम वर्त्मा
नुवर्तंते मनुष्याः पार्थ सर्वशः ॥ २३ ॥
उत्सीदेयुरिमे लोका न कुर्यां कर्म
चेदहम् ॥ संकरस्य च कर्ता स्यामुप
हन्यामिमाः प्रजाः ॥ २४ ॥ सक्ताः कर्म
ण्यविद्वांसो यथा कुर्वंति भारत ॥ कुर्या
द्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥

॥ २५ ॥ न बुद्धिभेदं जनयेदज्ञानां क
र्मसंगिनाम् ॥ जोषयेत्सर्वकर्माणि वि
द्वान्युक्तः समाचरन्॥ २६॥ प्रकृतेः क्रि
यमाणानि गुणैः कर्माणि सर्वशः ॥
अहंकारविमूढात्मा कर्ताहमिति मन्य
ते ॥ २७ ॥ तत्त्ववित्तु महाबाहो गुण
कर्मविभागयोः॥ गुणा गुणेषु वर्तंत इ

ति मत्वा न सज्जते ॥ २८ ॥ प्रकृतेर्गुणसं
मूढाः सज्जंते गुणकर्मसु ॥ तानकृत्स्नवि
दो मंदान्कृत्स्नविन्न विचालयेत् ॥ २९ ॥
मयि सर्वाणि कर्माणि संन्यस्याध्या
त्मचेतसा ॥ निराशीर्निर्ममो भूत्वा
युध्यस्व विगतज्वरः ॥ ३० ॥ ये मे म
तमिदं नित्यमनुतिष्ठंति मानवाः ॥

श्रद्धावंतोऽनसूयंतो मुच्यंते तेऽपि क
र्मभिः ॥ ३१ ॥ ये त्वेतदभ्यसूयंतो ना
नुतिष्ठंति मे मतम् ॥ सर्वज्ञानविमूढां
स्तान्विद्धि नष्टानचेतसः ॥ ३२ ॥ स
दृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ॥
प्रकृतिं यांति भूतानि निग्रहः किं करि
ष्यति ॥ ३३ ॥ इंद्रियस्येंद्रियस्यार्थे रा

गद्वेषौ व्यवस्थितौ ॥ तयोर्न वशमाग
च्छेत्तौ ह्यस्य परिपंथिनौ ॥ ३४ ॥ श्रे
यान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठि
तात् ॥ स्वधर्मे निधनं श्रेयः परधर्मो
भयावहः ॥ ३५ ॥ अर्जुन उवाच ॥
अथ केन प्रयुक्तोऽयं पापं चरति पूरु
षः ॥ अनिच्छन्नपि वार्ष्णेय बलादिव

नियोजितः ॥३६॥ श्रीभगवानुवाच ॥
काम एष क्रोध एष रजोगुणसमुद्भवः
॥ महाशनो महापाप्मा विद्ध्येनमिह
वैरिणम् ॥३७॥ धूमेनाव्रियते वह्नि
र्यथाऽऽदर्शो मलेन च ॥ यथोल्बेना
वृतो गर्भस्तथा तेनेदमावृतम् ॥३८॥
आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरि

णा ॥ कामरूपेण कौंतेय दुष्पूरेणानलेन च ॥ ३९ ॥ इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ॥ एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥ तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ ॥ पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥ ४१ ॥ इंद्रियाणि परा

ण्याहुरिंद्रियेभ्यः परं मनः ॥ मनसस्तु
परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४२ ॥
एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमा
त्मना ॥ जहि शत्रुं महाबाहो कामरू
पं दुरासदम् ॥४३॥ इति श्रीमद्भगव०
कर्मयोगोनाम तृतीयोऽध्यायः ॥ ३ ॥
श्रीभगवानुवाच ॥ इमं विवस्वते योगं

103737

प्रोक्तवानहमव्ययम् ॥ विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥१॥ एवं परंपराप्राप्तमिमं राजर्षयो विदुः॥ स कालेनेह महता योगो नष्टः परंतप ॥ २ ॥ स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ॥ भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥ अर्जुन उवा

च ॥ अपरं भवतो जन्म परं जन्म वि
वस्वतः ॥ कथमेतद्विजानीयां त्वमादौ
प्रोक्तवानिति ॥ ४ ॥ श्रीभगवानुवाच ॥
बहूनि मे व्यतीतानि जन्मानि तव चा
र्जुन ॥ तान्यहं वेद सर्वाणि न त्वं वेत्थ
परंतप ॥ ५ ॥ अजोऽपि सन्नव्ययात्मा
भूतानामीश्वरोऽपि सन् ॥ प्रकृतिं स्वा

मधिष्ठाय संभवाम्यात्ममायया ॥ ६ ॥ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ॥ अभ्युत्थानमधर्मस्य तदाऽत्मानं सृजाम्यहम् ॥ ७ ॥ परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥ धर्मसंस्थापनार्थाय संभवामि युगे युगे॥८॥ जन्मकर्म च मे दिव्यमेवं यो वेत्ति त

त्वतः ॥ त्यक्त्वा देहं पुनर्जन्म नैति
मामेति सोऽर्जुन ॥ ९ ॥ वीतरागभय
क्रोधा मन्मया मामुपाश्रिताः ॥ बह
वो ज्ञानतपसा पूता मद्भावमागताः
॥ १० ॥ ये यथा मां प्रपद्यंते तांस्तथै
व भजाम्यहम् ॥ मम वर्त्मानुवर्तंते म
नुष्याः पार्थ सर्वशः ॥ ११ ॥ कांक्षंतः

कर्मणां सिद्धिं यजंत इह देवताः ॥ क्षि
प्रं हि मानुषे लोके सिद्धिर्भवति कर्म
जा ॥ १२ ॥ चातुर्वर्ण्यं मया सृष्टं गुण
कर्मविभागशः ॥ तस्य कर्तारमपि मां
विद्ध्यकर्तारमव्ययम् ॥ १३ ॥ न मां क
र्माणि लिंपंति न मे कर्मफले स्पृहा ॥
इति मां योऽभिजानाति कर्मभिर्न स

बध्यते ॥ १४ ॥ एवं ज्ञात्वा कृतं कर्म
पूर्वैरपि मुमुक्षुभिः ॥ कुरु कर्मैव तस्मा
त्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥ किं क
र्म किमकर्मेति कवयोऽप्यत्र मोहिताः
॥ तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मो
क्ष्यसेऽशुभात् ॥ १६ ॥ कर्मणो ह्यपि बो
द्धव्यं बोद्धव्यं च विकर्मणः ॥ अकर्मण

श्च बोद्धव्यं गहना कर्मणो गतिः॥ १७॥
कर्मण्यकर्म यः पश्येदकर्मणि च कर्म
यः॥ स बुद्धिमान्मनुष्येषु स युक्तः कृ
त्स्नकर्मकृत्॥ १८॥ यस्य सर्वे समारं
भाः कामसंकल्पवर्जिताः॥ ज्ञानाग्निद
ग्धकर्माणं तमाहुः पंडितं बुधाः॥१९॥
त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निरा

श्रयः ॥ कर्मण्यभिप्रवृत्तोऽपि नैव किं
चित्करोति सः ॥ २० ॥ निराशीर्यत
चित्तात्मा त्यक्तसर्वपरिग्रहः ॥ शारीरं
केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्
॥२१॥ यदृच्छालाभसंतुष्टो द्वंद्वातीतो
विमत्सरः॥समः सिद्धावसिद्धौ च कृत्वा
पि न निबध्यते ॥२२॥ गतसंगस्य मुक्त

स्य ज्ञानावस्थितचेतसः ॥ यज्ञायाच रतः कर्म समग्रं प्रविलीयते ॥ २३ ॥ ब्र ह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुत म् ॥ ब्रह्मैव तेन गंतव्यं ब्रह्मकर्मसमाधि ना ॥ २४॥ दैवमेवापरे यज्ञं योगिनः प र्युपासते ॥ ब्रह्माग्नावपरे यज्ञं यज्ञेनैवो पजुह्वति ॥ २५ ॥ श्रोत्रादीनींद्रियाण्य

न्ये संयमाग्निषु जुह्वति ॥ शब्दादीन्वि
षयानन्य इंद्रियाग्निषु जुह्वति ॥ २६ ॥
सर्वाणींद्रियकर्माणि प्राणकर्माणि चा
परे ॥ आत्मसंयमयोगाग्नौ जुह्वति ज्ञा
नदीपिते ॥ २७ ॥ द्रव्ययज्ञास्तपोयज्ञा
योगयज्ञास्तथाऽपरे ॥ स्वाध्यायज्ञान
यज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥

अपाने जुह्वति प्राणं प्राणेऽपानं तथा
ऽपरे ॥ प्राणापानगती रुद्ध्वा प्राणाया
मपरायणाः ॥ २९ ॥ अपरे नियताहा
राः प्राणान्प्राणेषु जुह्वति ॥ सर्वेऽप्येते
यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥
यज्ञशिष्टामृतभुजो यांति ब्रह्म सनात
नम् ॥ नायं लोकोऽस्त्ययज्ञस्य कुतो

ऽन्यः कुरुसत्तम ॥ ३१ ॥ एवं बहुविधा
यज्ञा वितता ब्रह्मणो मुखे ॥ कर्मजा
न्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्य
से ॥ ३२ ॥ श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञा
नयज्ञः परंतप ॥ सर्वं कर्माखिलं पार्थ
ज्ञाने परिसमाप्यते ॥ ३३ ॥ तद्विद्धि
प्रणिपातेन परिप्रश्नेन सेवया ॥ उपदे

क्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥ यज्ज्ञात्वा न पुनर्मोहमेवं या स्यसि पांडव ॥ येन भूतान्यशेषेण द्र क्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥ अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ॥ सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥ यथैधांसि समिद्धोऽग्निर्भस्म

शांतिमाप्नोत्यनुत्तमां ॥ ३९ ॥ ॐ
तत्सत्यं योगसंसिद्धः कालेनात्मनि विंदति ॥ ३८ ॥ श्रद्धावाँल्लभते ज्ञानं त
त्परः संयतेंद्रियः ॥ ज्ञानं लब्ध्वा परां
हि ज्ञानेन सदृशं पवित्रमिह विद्यते ॥
णि भस्मसात्कुरुते तथा ॥ ३७ ॥ न
सात्कुरुतेऽर्जुन ॥ ज्ञानाग्निः सर्वकर्मा

ज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्य
ति ॥ नायं लोकोऽस्ति न परो न सुखं
संशयात्मनः ॥ ४० ॥ योगसंन्यस्तक
र्माणं ज्ञानसंछिन्नसंशयम् ॥ आत्मवं
तं न कर्माणि निबध्नंति धनंजय॥४१॥
तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिना
त्मनः ॥ छित्त्वैनं संशयं योगमातिष्ठो

त्तिष्ठ भारत॥४२॥ इति श्रीमद्भग० ज्ञा
नविभागयोगो० चतुर्थोऽध्यायः॥ ४॥
अर्जुन उवाच॥ संन्यासं कर्मणां कृष्ण पु
नर्योगं च शंससि ॥ यच्छ्रेय एतयोरेकं
तन्मे ब्रूहि सुनिश्चितम्॥१॥श्रीभगवानु
वाच ॥ संन्यासः कर्मयोगश्च निःश्रेयस
करावुभौ ॥ तयोस्तु कर्मसंन्यासात्कर्म

योगो विशिष्यते ॥२॥ ज्ञेयः स नित्यसं
न्यासी यो न द्वेष्टि न कांक्षति॥ निर्द्वंद्वो
हि महाबाहो सुखं बंधात्प्रमुच्यते ॥३॥
सांख्ययोगौ पृथग्बालाः प्रवदंति न पं
डिताः॥ एकमप्यास्थितः सम्यगुभयो
र्विंदते फलम्॥ ४ ॥ यत्सांख्यैः प्राप्य
ते स्थानं तद्योगैरपि गम्यते ॥ एकं सां

ख्यं च योगं च यः पश्यति स पश्यति
॥५॥ संन्यासस्तु महाबाहो दुःखमाप्तु
मयोगतः ॥योगयुक्तो मुनिर्ब्रह्म न चिरे
णाधिगच्छति ॥६॥ योगयुक्तो विशुद्धा
त्मा विजितात्मा जितेंद्रियः॥सर्वभूता
त्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥
नैव किंचित्करोमीति युक्तो मन्येत त

त्त्ववित्॥ पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्न
न्गच्छन्स्वपन्श्वसन्॥ ८॥ प्रलपन्विसृ
जन्गृह्णन्नुन्मिषन्निमिषन्नपि॥ इंद्रिया
णींद्रियार्थेषु वर्तंत इति धारयन्॥ ९॥
ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा क
रोति यः॥ लिप्यते न स पापेन पद्म
पत्रमिवांभसा॥ १०॥ कायेन मनसा

बुद्ध्या केवलैरिंद्रियैरपि ॥ योगिनः कर्म
कुर्वंति संगं त्यक्त्वाऽऽत्मशुद्धये ॥ ११ ॥
युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति
नैष्ठिकीम् ॥ अयुक्तः कामकारेण फले
सक्तो निबध्यते ॥ १२ ॥ सर्वकर्माणि
मनसा संन्यस्यास्ते सुखं वशी ॥ नव
द्वारे पुरे देही नैव कुर्वन्न कारयन्

॥ १३ ॥ न कर्तृत्वं न कर्माणि लोक
स्य सृजति प्रभुः ॥ न कर्मफलसंयोगं
स्वभावस्तु प्रवर्तते ॥ १४ ॥ नादत्ते क
स्यचित्पापं न चैव सुकृतं विभुः ॥ अ
ज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः
॥१५॥ ज्ञानेन तु तदज्ञानं येषां नाशि
तमात्मनः ॥ तेषामादित्यवज्ज्ञानं प्र

काशयति तत्परम् ॥ १६ ॥ तद्बुद्धयस्त
दात्मानस्तन्निष्ठास्तत्परायणाः ॥ गच्छं
त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥
॥१७॥ विद्याविनयसंपन्ने ब्राह्मणे गवि
हस्तिनि ॥ शुनि चैव श्वपाके च पंडि
ताः समदर्शिनः ॥ १८ ॥ इहैव तैर्जि
तःसर्गो येषां साम्ये स्थितं मनः ॥निर्दो

षं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥१९॥ न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ॥ स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥२०॥ बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखम् ॥ स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥ २१ ॥ ये हि संस्पर्शजा

भोगा दुःखयोनय एव ते ॥ आद्यंतवं
तः कौंतेय न तेषु रमते बुधः ॥ २२ ॥
शक्नोतीहैव यः सोढुं प्राक् शरीरविमो
क्षणात् ॥ कामक्रोधोद्भवं वेगं स युक्तः
स सुखी नरः ॥२३॥ योंऽतःसुखोंऽतरा
रामस्तथांतर्ज्योतिरेव यः ॥ स योगी ब्र
ह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति॥२४॥

लभंते ब्रह्म निर्वाणमृषयः क्षीणकल्म
षाः ॥ छिन्नद्वैधा यतात्मानः सर्वभूत
हिते रताः ॥ २५ ॥ कामक्रोधवियुक्ता
नां यतीनां यतचेतसाम्॥अभितो ब्रह्म
निर्वाणं वर्तते विदितात्मनाम् ॥ २६ ॥
स्पर्शान्कृत्वा बहिर्बाह्यां श्चक्षुश्चैवांतरे
भ्रुवोः ॥ प्राणापानौ समौ कृत्वा नासा

भ्यंतरचारिणौ ॥ २७ ॥ यतेंद्रियमनो
बुद्धिर्मुनिर्मोक्षपरायणः ॥ विगतेच्छा
भयक्रोधो यः सदा मुक्त एव सः॥२८॥
भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ॥
सुहृदं सर्वभूतानां ज्ञात्वा मां शांति
मृच्छति॥२९॥ इति श्रीमद्भगवद्गीता०
संन्यासयोगो नाम पंचमोऽध्यायः॥५॥

श्रीभगवानुवाच ॥ अनाश्रितः कर्मफलं
कार्यं कर्म करोति यः ॥ स संन्यासी च
योगी च न निरग्निर्न चाक्रियः ॥ १ ॥
यं संन्यासमिति प्राहुर्योगं तं विद्धि पां
डव ॥ न ह्यसंन्यस्तसंकल्पो योगी भ
वति कश्चन ॥ २ ॥ आरुरुक्षोर्मुनेर्योगं
कर्म कारणमुच्यते ॥ योगारूढस्य त

स्यैव शमः कारणमुच्यते ॥ ३ ॥ यदा
हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते ॥ स
र्वसंकल्पसंन्यासी योगारूढस्तदोच्यते
॥ ४ ॥ उद्धरेदात्मनाऽऽत्मानं नात्मा
नमवसादयेत् ॥ आत्मैव ह्यात्मनो बं
धुरात्मैव रिपुरात्मनः ॥ ५ ॥ बंधुरा
त्माऽऽत्मनस्तस्य येनात्मैवात्मना जि

तः ॥ अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव
शत्रुवत् ॥ ६ ॥ जितात्मनः प्रशांतस्य
परमात्मा समाहितः ॥ शीतोष्णसुख
दुःखेषु तथा मानापमानयोः ॥ ७ ॥
ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितें
द्रियः ॥ युक्त इत्युच्यते योगी समलो
ष्टाश्मकांचनः ॥ ८ ॥ सुहृन्मित्रार्युदा

सीनमध्यस्थद्वेष्यबंधुषु ॥ साधुष्वपि च
पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥ यो
गी युंजीत सततमात्मानं रहसि स्थि
तः ॥ एकाकी यतचित्तात्मा निराशी
रपरिग्रहः ॥ १० ॥ शुचौ देशे प्रतिष्ठाप्य
स्थिरमासनमात्मनः ॥ नात्युच्छ्रितं ना
तिनीचं चैलाजिनकुशोत्तरम् ॥ ११ ॥

तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रि
यः ॥ उपविश्यासने युंज्याद्योगमात्म
विशुद्धये ॥ १२ ॥ समं कायशिरोग्रीवं
धारयन्नचलं स्थिरः ॥ संप्रेक्ष्य नासिका
ग्रं स्वं दिशश्चानवलोकयन् ॥ १३ ॥
प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थि
तः ॥ मनः संयम्य मच्चित्तो युक्त आ

सीत मत्परः ॥ १४ ॥ युंजन्नेवं सदा
ऽऽत्मानं योगी नियतमानसः ॥ शां
तिं निर्वाणपरमां मत्संस्थामधिगच्छ
ति ॥ १५ ॥ नात्यश्नतस्तु योगोऽस्ति
न चैकांतमनश्नतः ॥ न चातिस्वप्नशी
लस्य जाग्रतो नैव चार्जुन ॥ १६ ॥ यु
क्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥

युक्तस्वभावबोधस्य योगो भवति दुःख
हा ॥ १७ ॥ यदा विनियतं चित्तमा
त्मन्येवावतिष्ठते ॥ निःस्पृहः सर्वकामे
भ्यो युक्त इत्युच्यते तदा ॥ १८ ॥ य
था दीपो निवातस्थो नेंगते सोमपा स्मृ
ता ॥ योगिनो यतचित्तस्य युंजतो यो
गमात्मनः ॥ १९ ॥ यत्रोपरमते चित्तं

निरुद्धं योगसेवया ॥ यत्र चैवात्मना
ऽऽत्मानं पश्यन्नात्मनि तुष्यति॥२०॥
सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रि
यम् ॥ वेत्ति यत्र न चैवायं स्थितश्चल
ति तत्त्वतः ॥ २१ ॥ यं लब्ध्वा चापरं
लाभं मन्यते नाधिकं ततः ॥ यस्मिं
स्थितो न दुःखेन गुरुणापि विचाल्य

ते ॥ २२ ॥ तं विद्याद्दुःखसंयोगवियोगं
योगसंज्ञितम् ॥ स निश्चयेन योक्तव्यो
योगो निर्विण्णचेतसा ॥ २३ ॥ संकल्प
प्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः॥
मनसैवेन्द्रियग्रामं विनियम्य समंत
तः ॥ २४ ॥ शनैःशनैरुपरमेद्बुद्ध्या धृ
तिगृहीतया ॥ आत्मसंस्थं मनः कृत्वा

न किंचिदपि चिंतयेत् ॥ २५ ॥ यतो
यतो निश्चरति मनश्चंचलमस्थिरम् ॥
ततस्ततो नियम्यैतदात्मन्येव वशं न
येत् ॥ २६ ॥ प्रशांतमनसं ह्येनं योगि
नं सुखमुत्तमम् ॥ उपैति शांतरजसं ब्र
ह्मभूतमकल्मषम्॥२७॥युंजन्नेवं सदा
ऽऽत्मानं योगी विगतकल्मषः ॥ सुखे

न ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते॥२८॥
सर्वभूतस्थमात्मानं सर्वभूतानि चा
त्मनि ॥ ईक्षते योगयुक्तात्मा सर्वत्र स
मदर्शनः ॥२९॥ यो मां पश्यति सर्व
त्र सर्वं च मयि पश्यति ॥ तस्याहं न
प्रणश्यामि स च मे न प्रणश्यति॥३०॥
सर्वभूतस्थितं यो मां भजत्येकत्वमा

स्थितः ॥ सर्वथा वर्तमानोऽपि स योगी
मयि वर्तते॥ ३१॥आत्मौपम्येन सर्वत्र
समं पश्यति योऽर्जुन ॥ सुखं वा यदि
वा दुःखं स योगी परमो मतः॥३२॥अ
र्जुन उवाच॥ योऽयं योगस्त्वया प्रोक्तः
साम्येन मधुसूदन ॥ एतस्याहं न पश्या
मि चंचलत्वात्स्थितिं स्थिराम्॥ ३३ ॥

चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥ श्रीभगवानुवाच ॥ असंशयं महाबाहो मनो दुर्निग्रहं चलम् ॥ अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ॥ ३५ ॥ असंयतात्मना योगो दुष्प्राप इति मे मतिः ॥ वश्यात्मना

तु यतता शक्योऽवाप्तुमुपायतः॥ ३६॥
अर्जुन उवाच ॥ अयतिः श्रद्धयोपेतो
योगाच्चलितमानसः ॥ अप्राप्य योगसं
सिद्धिं कां गतिं कृष्ण गच्छति॥ ३७॥क
च्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्य
ति॥ अप्रतिष्ठो महाबाहो विमूढो ब्रह्म
णः पथि ॥ ३८ ॥ एतन्मे संशयं कृष्ण

छेत्तुमर्हस्यशेषतः ॥ त्वदन्यः संशयस्या
स्य छेत्ता नह्युपपद्यते ॥३९॥ श्रीभगवा
नुवाच ॥ पार्थ नैवेह नामुत्र विनाश
स्तस्य विद्यते ॥ नहि कल्याणकृत्कश्चि
दुर्गतिं तात गच्छति ॥४०॥ प्राप्य पुण्य
कृताँल्लोकानुषित्वा शाश्वतीः समाः ॥
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभि


जायते ॥ ४१ ॥ अथवा योगिनामेव
कुले भवति धीमताम् ॥ एतद्धि दुर्लभ
तरं लोके जन्म यदीदृशम् ॥ ४२ ॥ त
त्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ॥
यतते च ततो भूयः संसिद्धौ कुरुनंद
न ॥ ४३ ॥ पूर्वाभ्यासेन तेनैव ह्रियते
ह्यवशो ऽपि सः ॥ जिज्ञासुरपि योगस्य

शब्दब्रह्मातिवर्तते ॥ ४४ ॥ प्रयत्नाद्य
तमानस्तु योगी संशुद्धकिल्बिषः ॥ अ
नेकजन्मसंसिद्धस्ततो याति परां गति
म् ॥ ४५ ॥ तपस्विभ्योऽधिको योगी
ज्ञानिभ्योऽपि मतोऽधिकः ॥ कर्मिभ्य
श्चाधिको योगि तस्माद्योगी भवार्जुन
॥ ४६ ॥ योगिनामपि सर्वेषां मद्गतेनां

तरात्मना ॥ श्रद्धावान्भजते यो मां स
मे युक्ततमो मतः ॥ ४७ ॥ इति श्रीम
द्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे अध्या
त्म योगो नाम षष्ठोऽध्यायः ॥ ६ ॥



॥ इति प्रथमं कर्मग्रंथं समाप्तं ॥



॥ अथ द्वितीयमुपासनाषट्कं ॥

श्रीभगवानुवाच ॥ मय्यासक्तमनाः पार्थ योगं युंजन्मदाश्रयः ॥ असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥१॥ ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ॥ यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥२॥ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ॥ यततामपि सिद्धा

नां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३ ॥ भू
मिरापोऽनलो वायुः खं मनो बुद्धिरेव
च ॥ अहंकार इतीयं मे भिन्ना प्रकृति
रष्टधा ॥ ४ ॥ अपरेयमितस्त्वन्यां प्र
कृतिं विद्धि मे पराम् ॥ जीवभूतां महा
बाहो ययेदं धार्यते जगत् ॥ ५ ॥ एत
द्योनीनि भूतानि सर्वाणीत्युपधारय ॥

अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्त
था॥६॥मत्तः परतरं नान्यत्किंचिदस्ति
धनंजय ॥ मयि सर्वमिदं प्रोतं सूत्रे म
णिगणा इव ॥ ७॥ रसोऽहमप्सु कौंते
य प्रभाऽस्मि शशिसूर्ययोः ॥ प्रणवः
सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥
पुण्यो गंधः पृथिव्यां च तेजश्चास्मि वि

भावसौ ॥ जीवनं सर्वभूतेषु तपश्चास्मि
तपस्विषु ॥ ९ ॥ बीजं मां सर्वभूतानां
विद्धि पार्थ सनातनम् ॥ बुद्धिर्बुद्धिमता
मस्मि तेजस्तेजस्विनामहम् ॥ १० ॥
बलं बलवतामस्मि कामरागविवर्जित
म् ॥ धर्माविरुद्धो भूतेषु कामोऽस्मि भ
रतर्षभ ॥ ११ ॥ ये चैव सात्विका भा

वा राजसास्तामसाश्च ये ॥ मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२ ॥ त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ॥ मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥ दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥ १४ ॥

न मां दुष्कृतिनो मूढाः प्रपद्यंते नराध
माः ॥ माययापहृतज्ञाना आसुरं भा
वमाश्रिताः ॥ १५ ॥ चतुर्विधा भजंते
मां जनाः सुकृतिनोऽर्जुन ॥ आर्तो जि
ज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥ १६॥
तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशि
ष्यते ॥ प्रियो हि ज्ञानिनोऽत्यर्थमहं स

च मम प्रियः ॥ १७ ॥ उदाराः सर्व ए
वैते ज्ञानी त्वात्मैव मे मतम् ॥ आस्थि
तः स हि युक्तात्मा मामेवानुत्तमां ग
तिम् ॥ १८ ॥ बहूनां जन्मनामंते ज्ञा
नवान्मां प्रपद्यते ॥ वासुदेवः सर्वमिति
स महात्मा सुदुर्लभः ॥ १९ ॥ कामैस्तै
स्तैर्हृतज्ञानाः प्रपद्यंतेऽन्यदेवताः ॥ तं

तं नियममास्थाय प्रकृत्या नियताः स
या ॥ २० ॥ यो यो यां यां तनुं भक्तः
श्रद्धयार्चितुमिच्छति॥तस्य तस्याचलां
श्रद्धां तामेव विदधाम्यहम् ॥२१॥ स
तया श्रद्धया युक्तस्तस्याराधनमीहते॥
लभते च ततः कामान्मयैव विहिता
न्हि तान् ॥ २२ ॥ अंतवत्तु फलं तेषां त

द्भवत्यल्पमेधसाम् ॥ देवान्देवयजो यां
ति मद्भक्ता यांति मामपि ॥२३॥ अव्य
क्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः ॥
परं भावमजानंतो ममाव्ययमनुत्तम
म् ॥२४॥ नाहं प्रकाशः सर्वस्य योग
मायासमावृतः ॥ मूढोऽयं नाभिजाना
ति लोको मामजमव्ययम् ॥ २५ ॥ वे

दाहं समतीतानि वर्तमानानि चार्जुन ॥ भविष्याणि च भूतानि मां तु वेद न कश्चन ॥ २६ ॥ इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत ॥ सर्वभूतानि संमोहं सर्गे यांति परंतप ॥ २७ ॥ येषां त्वंत गतं पापं जनानां पुण्यकर्मणाम् ॥ ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः

॥२८॥ जरामरणमोक्षाय मामाश्रित्य
यतंति ये ॥ ते ब्रह्म तद्विदुः कृत्स्नमध्या
त्मं कर्म चाखिलम् ॥ २९ ॥ साधिभू
ताधिदैवं मां साधियज्ञं च ये विदुः ॥
प्रयाणकालेऽपि च मां ते विदुर्युक्तचे
तसः ॥ ३० ॥ इति श्रीमद्भगवद्गी० ज्ञा
नयोगो नाम सप्तमोऽध्यायः ॥ ७ ॥

अर्जुन उवाच ॥ किं तद्ब्रह्म किमध्या
त्मं किं कर्म पुरुषोत्तम ॥ अधिभूतं च
किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥
अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधु
सूदन ॥ प्रयाणकाले च कथं ज्ञेयोऽसि
नियतात्मभिः ॥२॥ श्रीभगवानुवाच॥
अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममु

च्यते ॥ भूतभावोद्भवकरो विसर्गः क
र्मसंज्ञितः ॥ ३ ॥ अधिभूतं क्षरो भावः
पुरुषश्चाधिदैवतम् ॥ अधियज्ञोऽहमे
वात्र देहे देहभृतां वर ॥ ४ ॥ अंतका
ले च मामेव स्मरन्मुक्त्वा कलेवरम् ॥
यः प्रयाति स मद्भावं याति नास्त्यत्र
संशयः ॥ ५ ॥ यं यं वापि स्मरन्भावं

त्यजत्यंते कलेवरम् ॥ तं तमेवैति कौंते
य सदा तद्भावभावितः ॥ ६ ॥ तस्मात्स
र्वेषु कालेषु मामनुस्मर युद्ध्य च ॥ म
य्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम्
॥ ७ ॥ अभ्यासयोगयुक्तेन चेतसा ना
न्यगामिना ॥ परमं पुरुषं दिव्यं याति
पार्थानुचिंतयन् ॥ ८ ॥ कविं पुराणमनु

शासितारमणोरणीयांसमनुस्मरेद्यः ॥
सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं
तमसः परस्तात् ॥ ९ ॥ प्रयाणकाले
मनसाऽचलेन भक्त्या युक्तो योगबले
न चैव ॥ भ्रुवोर्मध्ये प्राणमावेश्य सम्य
क् स तं परं पुरुषमुपैति दिव्यम् ॥ १० ॥
यदक्षरं वेदविदो वदंति विशंति यद्यत

यो वीतरागाः ॥ यदिच्छंतो ब्रह्मचर्यं
चरंति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥
सर्वद्वाराणि संयम्य मनो हृदि निरुध्य
च ॥ मूर्ध्न्याधायात्मनः प्राणमास्थितो
योगधारणाम् ॥ १२ ॥ ॐमित्येकाक्षरं
ब्रह्म व्याहरन्मामनुस्मरन् ॥ यः प्रया
ति त्यजन्देहं स याति परमां गतिम्

॥ १३ ॥ अनन्यचेताः सततं यो मां स्मरति नित्यशः ॥ तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥ मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ॥ नाप्नुवंति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ॥ मामुपेत्य तु कौंते

य पुनजन्म न विद्यते ॥ १६ ॥ सहस्र
युगपर्यंतमहर्यद्ब्रह्मणो विदुः ॥ रात्रिं यु
गसहस्रां तां तेऽहोरात्रविदो जनाः
॥ १७ ॥ अव्यक्ताद्व्यक्तयः सर्वाः प्रभवं
त्यहरागमे ॥ रात्र्यागमे प्रलीयंते तत्रै
वाव्यक्तसंज्ञके ॥ १८ ॥ भूतग्रामः स
एवायं भूत्वा भूत्वा प्रलीयते ॥ रात्र्या

गमेऽवशः पार्थ प्रभवत्यहरागमे॥१९॥
परस्तस्मात्तु भावोऽन्यो व्यक्तोऽव्यक्ता
त्सनातनः ॥ यः स सर्वेषु भूतेषु नश्य
त्सु न विनश्यति ॥ २० ॥ अव्यक्तोऽक्ष
र इत्युक्तस्तमाहुः परमां गतिम् ॥ यं
प्राप्य न निवर्तंते तद्धाम परमं मम
॥२१॥पुरुषः स परः पार्थ भक्त्या लभ्य

स्त्वनन्यया ॥ यस्यांतःस्थानि भूतानि
येन सर्वमिदं ततम् ॥ २२ ॥ यत्र काले
त्वनावृत्तिमावृत्तिं चैव योगिनः ॥ प्र
याता यांति तं कालं वक्ष्यामि भरत
र्षभ ॥ २३ ॥ अग्निर्ज्योतिरहः शुक्लः
षण्मासा उत्तरायणम् ॥ तत्र प्रयाता ग
च्छंति ब्रह्म ब्रह्मविदो जनाः ॥ २४ ॥

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षि
णायनम् ॥ तत्र चांद्रमसं ज्योतिर्योगी
प्राप्य निवर्तते ॥ २५ ॥ शुक्लकृष्णे ग
ती ह्येते जगतः शाश्वते मते ॥ एकया
यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः ॥
॥ २६ ॥ नैते सृती पार्थ जानन् योगी
मुह्यति कश्चन ॥ तस्मात्सर्वेषु कालेषु

योगयुक्तो भवार्जुन ॥ २७ ॥ वेदेषु
यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं
प्रदिष्टम् ॥ अत्येति तत्सर्वमिदं विदि
त्वा योगी परं स्थानमुपैति चाद्यम् ॥
॥ २८ ॥ इति श्रीमद्भगवद्गीता० योग
शास्त्रेऽक्षरब्रह्मयोगो नामाष्टमोऽध्या
यः ॥ ८ ॥ ॥ श्रीभगवानुवाच ॥ इदं तु

ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ॥ ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥ राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ॥ प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥ अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ॥ अप्राप्य मां निवर्तंते मृत्युसंसारवर्त्मनि ॥

॥ ३ ॥ मया ततमिदं सर्वं जगदव्यक्त
मूर्तिना ॥ मत्स्थानि सर्वभूतानि न चा
हं तेष्ववस्थितः ॥ ४ ॥ न च मत्स्था
नि भूतानि पश्य मे योगमैश्वरम् ॥ भू
तभृन्न च भूतस्थो ममात्मा भूतभाव
नः ॥ ५ ॥ यथाऽऽकाशस्थितो नित्यं
वायुः सर्वत्रगो महान् ॥ तथा सर्वाणि

भूतानि मत्स्थानीत्युपधारय ॥ ६ ॥ स
र्वभूतानि कौंतेय प्रकृतिं यांति मामि
काम् ॥ कल्पक्षये पुनस्तानि कल्पादौ
विसृजाम्यहम् ॥ ७ ॥ प्रकृतिं स्वामव
ष्टभ्य विसृजामि पुनः पुनः ॥ भूतग्रा
ममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥
न च मां तानि कर्माणि निबध्नंति धनं

जय ॥ उदासीनवदासीनमसक्तं तेषु क
र्मसु ॥ ९ ॥ मयाऽध्यक्षेण प्रकृतिः सूय
ते सचराचरम् ॥ हेतुनाऽनेन कौंतेय ज
गद्विपरिवर्तते ॥ १० ॥ अवजानंति मां
मूढा मानुषीं तनुमाश्रितम् ॥ परं भाव
मजानंतो मम भूतमहेश्वरम् ॥ ११ ॥
मोघाशा मोघकर्माणो मोघज्ञाना वि

चेतसः ॥ राक्षसीमासुरीं चैव प्रकृतिं मो
हिनीं श्रिताः ॥ १२ ॥ महात्मानस्तु
मां पार्थ दैवीं प्रकृतिमाश्रिताः ॥ भजं
त्यनन्यमनसो ज्ञात्वा भूतादिमव्यय
म् ॥ १३ ॥ सततं कीर्तयंतो मां यतं
तश्च दृढव्रताः ॥ नमस्यंतश्च मां भ
क्त्या नित्ययुक्ता उपासते ॥ १४ ॥

ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपा
सते ॥ एकत्वेन पृथक्त्वेन बहुधा विश्व
तोमुखम् ॥ १५ ॥ अहं क्रतुरहं यज्ञः
स्वधाहमहमौषधम् ॥ मंत्रोऽहमहमे
वाज्यमहमग्निरहं हुतम् ॥ १६ ॥ पि
ताहमस्य जगतो माता धाता पिताम
हः ॥ वेद्यं पवित्रमोंकार ऋक् साम य

जुरेव च ॥ १७ ॥ गतिर्भर्ता प्रभुः साक्षी
निवासः शरणं सुहृत् ॥ प्रभवः प्रलयः
स्थानं निधानं बीजमव्ययम् ॥ १८ ॥
तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि
च ॥ अमृतं चैव मृत्युश्च सदसच्चाहम
र्जुन ॥ १९ ॥ त्रैविद्या मां सोमपाः पू
तपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ॥ ते

पुण्यमासाद्य सुरेंद्रलोकमश्नंति दिव्या
न्दिवि देवभोगान् ॥ २० ॥ ते तं भुक्त्वा
स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलो
कं विशंति ॥ एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभंते ॥ २१ ॥ अ
नन्याश्चिंतयंतो मां ये जनाः पर्युपास
ते ॥ तेषां नित्याभियुक्तानां योगक्षेमं

वहाम्यहम् ॥ २२ ॥ येऽप्यन्यदेवताभ
क्ता यजंते श्रद्धयान्विताः ॥ तेऽपि मामे
व कौंतेय यजंत्यविधिपूर्वकम् ॥ २३ ॥
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव
च ॥ न तु मामभिजानंति तत्त्वेनात
श्च्यवंति ते ॥२४॥ यांति देवव्रता देवान्
पितॄन्यांति पितृव्रताः ॥ भूतानि यां

ति भूतेज्या यांति मद्याजिनोऽपि मा
म् ॥ २५ ॥ पत्रं पुष्पं फलं तोयं यो मे
भक्त्या प्रयच्छति॥तदहं भक्त्युपहृतम
श्नामि प्रयतात्मनः ॥ २६ ॥ यत्करोषि
यदश्नासि यज्जुहोषि ददासि यत् ॥ य
त्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम्
॥ २७ ॥ शुभाशुभफलैरेवं मोक्ष्यसे क

र्मबंधनैः ॥ संन्यासयोगयुक्तात्मा विमु
क्तो मामुपैष्यसि ॥ २८ ॥ समोहं सर्व
भूतेषु न मे द्वेष्योऽस्ति न प्रियः ॥ ये भ
जंति तु मां भक्त्या मयि ते तेषु चाप्यह
म् ॥ २९ ॥ अपि चेत्सुदुराचारो भज
ते मामनन्यभाक् ॥ साधुरेव स मंतव्यः
सम्यग्व्यवसितो हि सः ॥ ३० ॥ क्षिप्रं

भवति धर्मात्मा शश्वच्छांतिं निगच्छ
ति ॥ कौंतेय प्रतिजानीहि न मे भक्तः
प्रणश्यति ॥ ३१ ॥ मां हि पार्थ व्यपा
श्रित्य येऽपि स्युः पापयोनयः ॥ स्त्रियो
वैश्यास्तथा शूद्रास्तेऽपि यांति परां ग
तिम् ॥ ३२ ॥ किं पुनर्ब्राह्मणाः पुण्या
भक्ता राजर्षयस्तथा ॥ अनित्यमसुखं

लोकमिमंप्राप्य भजस्व माम् ॥ ३३ ॥ म
न्मना भव मद्भक्तो मद्याजी मां नम
स्कुरु ॥ मामेवैष्यसि युक्त्वैवमात्मानं
मत्परायणः ॥ ३४ ॥ इति श्रीमद्भगव
द्गी०राजविद्याराजगुह्ययोगो नाम नव
मोऽध्यायः ॥ ९ ॥ ॥श्रीभगवानुवाच ॥
भूय एव महाबाहो शृणु मे परमं वचः ॥

यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितका
म्यया ॥ १ ॥ न मे विदुः सुरगणाः प्र
भवं न महर्षयः ॥ अहमादिर्हि देवानां
महर्षीणां च सर्वशः ॥ २ ॥ यो मामज
मनादिं च वेत्ति लोकमहेश्वरम् ॥ असं
मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥३॥
बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः श

मः॥सुखं दुःखं भवो भावो भयं चाभ
यमेव च॥ ४॥ अहिंसा समता तुष्टिस्त
पो दानं यशोऽयशः॥ भवंति भावा भू
तानां मत्त एव पृथग्विधाः॥ ५॥ मह
र्षयः सप्त पूर्वे चत्वारो मनवस्तथा॥ म
द्भावा मानसा जाता येषां लोक इमाः
प्रजाः॥ ६॥ एतां विभूतिं योगं च म

म यो वेत्ति तत्त्वतः ॥ सोऽविकंपेन यो
गेन युज्यते नात्र संशयः ॥ ७ ॥ अहं
सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ॥ इति
मत्वा भजंते मां बुधा भावसमन्विताः
॥ ८ ॥ मच्चित्ता मद्गतप्राणा बोधयंतः
परस्परम् ॥ कथयंतश्च मां नित्यं तुष्यं
ति च रमंति च ॥ ९ ॥ तेषां सततयुक्ता

नां भजतां प्रीतिपूर्वकम्॥ ददामि बुद्धि
योगं तं येन मामुपयांति ते ॥ १० ॥ ते
षामेवानुकंपार्थमहमज्ञानजंतमः॥ना
शयाम्यात्मभावस्थो ज्ञानदीपेन भा
स्वता ॥ ११ ॥ ॥ अर्जुन उवाच॥ परं
ब्रह्म परं धाम पवित्रं परमं भवान्॥ पुरु
षं शाश्वतं दिव्यमादिदेवमजं विभुम्

॥१२॥ आहुस्त्वामृषयः सर्वे देवर्षिर्ना
रदस्तथा॥ असितो देवलो व्यासः स्वयं
चैव ब्रवीषि मे ॥ १३ ॥ सर्वमेतदृतं म
न्ये यन्मां वदसि केशव ॥ नहि ते भग
वन्व्यक्तिं विदुर्देवा न दानवाः ॥१४॥
स्वयमेवात्मनाऽऽत्मानं वेत्थ त्वं पुरु
षोत्तम ॥ भूतभावन भूतेश देवदेव ज

गत्पते ॥१५॥ वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ॥ याभिर्विभूतिभिर्लो कानिमांस्त्वं व्याप्य तिष्ठसि ॥१६॥ क थं विद्यामहं योगिंस्त्वां सदा परिचिंत यन् ॥ केषु केषु च भावेषु चिंत्योऽसि भगवन्मया ॥ १७ ॥ विस्तरेणात्मनो योगं विभूतिं च जनार्दन ॥ भूयः कथ

य तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम्
॥ १८ ॥ श्रीभगवानुवाच ॥ हंत ते कथ
यिष्यामि दिव्या ह्यात्मविभूतयः ॥ प्रा
धान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्तरस्य
मे ॥ १९ ॥ अहमात्मा गुडाकेश सर्वभू
ताशयस्थितः ॥ अहमादिश्च मध्यं च
भूतानामंत एव च ॥ २० ॥ आदित्या

नामहं विष्णुर्ज्योतिषां रविरंशुमान् ॥ मरीचिर्मरुतामस्मि नक्षत्राणामहं श शी ॥ २१ ॥ वेदानां सामवेदोऽस्मि दे वानामस्मि वासवः ॥ इंद्रियाणां मन श्चास्मि भूतानामस्मि चेतना ॥ २२ ॥ रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्ष साम् ॥ वसूनां पावकश्चास्मि मेरुः शि

खरिणामहम् ॥ २३ ॥ पुरोधसां च मु
ख्यं मां विद्धि पार्थ बृहस्पतिम् ॥ सेना
नीनामहं स्कंदः सरसामस्मि सागरः
॥ २४ ॥ महर्षीणां भृगुरहं गिरामस्म्ये
कमक्षरम् ॥ यज्ञानां जपयज्ञोऽस्मि
स्थावराणां हिमालयः ॥२५॥ अश्वत्थः
सर्ववृक्षाणां देवर्षीणां च नारदः ॥ गंध

वाणां चित्ररथः सिद्धानां कपिलो मु
निः ॥ २६ ॥ उच्चैःश्रवसमश्वानां विद्धि
माममृतोद्भवम् ॥ ऐरावतं गजेंद्राणां न
राणां च नराधिपम् ॥ २७ ॥ आयुधा
नामहं वज्रं धेनूनामस्मि कामधुक् ॥
प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वा
सुकिः ॥ २८ ॥ अनंतश्चास्मि नागानां

वरुणो यादसामहम् ॥ पितॄणामर्यमा
चास्मि यमः संयमतामहम् ॥ २९ ॥ प्र
ह्लादश्चास्मि दैत्यानां कालः कलयता
महम् ॥ मृगाणां च मृगेंद्रोऽहं वैनतेय
श्च पक्षिणाम् ॥ ३० ॥ पवनः पवतामस्मि
रामः शस्त्रभृतामहम् ॥ झषाणां मकर
श्चास्मि स्रोतसामस्मि जाह्नवी ॥ ३१ ॥

सर्गाणामादिरंतश्च मध्यं चैवाहमर्जुन
॥ अध्यात्मविद्या विद्यानां वादः प्रवद
तामहम्॥३२॥अक्षराणामकारोऽस्मि
द्वंद्वः सामासिकस्य च ॥ अहमेवाक्षयः
कालो धाताऽहं विश्वतोमुखः॥ ३३ ॥
मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यता
म् ॥ कीर्तिः श्रीर्वाक्च नारीणां स्मृति

मेधा धृतिः क्षमा ॥ ३४ ॥ बृहत्साम
तथा साम्नां गायत्री छंदसामहम् ॥ मा
सानां मार्गशीर्षोऽहमृतूनां कुसुमाक
रः ॥ ३५ ॥ द्यूतं छलयतामस्मि तेज
स्तेजस्विनामहम् ॥ जयोऽस्मि व्यवसा
योऽस्मि सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥
वृष्णीनां वासुदेवोऽस्मि पांडवानां ध

नंजयः ॥ मुनीनामप्यहं व्यासः कवी
नामुशना कविः ॥ ३७ ॥ दंडो दमय
तामस्मि नीतिरस्मि जिगीषताम् ॥
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानव
तामहम् ॥ ३८ ॥ यच्चापि सर्वभूतानां
बीजं तदहमर्जुन ॥ न तदस्ति विना
यत्स्यान्मया भूतं चराचरम् ॥ ३९ ॥

नांतोऽस्ति मम दिव्यानां विभूतीनां
परंतप ॥ एष तूद्देशतः प्रोक्तो विभूते
र्विस्तरो मया ॥ ४० ॥ यद्यद्विभूतिम
त्सत्त्वं श्रीमदूर्जितमेव वा॥ तत्तदेवाव
गच्छ त्वं मम तेजोंऽशसंभवम् ॥४१॥
अथवा बहुनैतेन किं ज्ञातेन तवार्जुन॥
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो

जगत्॥४२॥इति श्रीमद्भगवद्गीता० वि
भूतियोगो नाम दशमोऽध्यायः॥१०॥
अर्जुन उवाच ॥ मदनुग्रहाय परमं गु
ह्यमध्यात्मसंज्ञितम् ॥ यत्त्वयोक्तं वच
स्तेन मोहोऽयं विगतो मम ॥ १ ॥ भ
वाप्ययौ हि भूतानां श्रुतौ विस्तरशो म
या ॥ त्वत्तः कमलपत्राक्ष माहात्म्य

मपि चाव्ययम् ॥ २ ॥ एवमेतद्यथात्थ
त्वमात्मानं परमेश्वर ॥ द्रष्टुमिच्छामि
ते रूपमैश्वरं पुरुषोत्तम ॥ ३ ॥ मन्यसे
यदि तच्छक्यं मया द्रष्टुमिति प्रभो ॥
योगेश्वर ततो मे त्वं दर्शयात्मानमव्य
यम् ॥४॥ श्रीभगवानुवाच ॥ पश्य मे
पार्थ रूपाणि शतशोऽथ सहस्रशः ॥

नानाविधानि दिव्यानि नानावर्णाकृ
तीन च ॥५॥ पश्यादित्यान्वसून्रुद्रान
श्विनौ मरुतस्तथा॥बहून्यदृष्टपूर्वाणि प
श्याश्चर्याणि भारत ॥६॥ इहैकस्थं जग
त्कृत्स्नं पश्याद्य सचराचरम् ॥ मम देहे
गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ७॥
नतुमांशक्यसे द्रष्टुमनेनैव स्वचक्षुषा॥

दिव्यं ददामि ते चक्षुः पश्य मे योगमै
श्वरम् ॥८॥ संजय उवाच ॥ एवमुक्त्वा
ततो राजन् महायोगेश्वरो हरिः ॥ दर्श
यामास पार्थाय परमं रूपमैश्वरम् ॥९॥
अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ॥अ
नेकदिव्याभरणं दिव्यानेकोद्यतायुध
म् ॥१०॥दिव्यमाल्यांबरधरं दिव्यगंधा

नुलेपनम् ॥ सर्वाश्चर्यमयं देवमनंतं वि
श्वतोमुखम् ॥११॥ दिवि सूर्यसहस्रस्य
भवेद्युगपदुत्थिता ॥ यदि भाः सदृशी
सा स्याद्भासस्तस्य महात्मनः ॥ १२ ॥
तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा
॥ अपश्यद्देवदेवस्य शरीरे पांडवस्तदा
॥ १३ ॥ ततः स विस्मयाविष्टो हृष्टरो

मा धनंजयः ॥ प्रणम्य शिरसा देवं कृ
तांजलिरभाषत ॥१४॥ अर्जुन उवाच॥
पश्यामि देवांस्तव देव देहे सर्वांस्तथा
भूतविशेषसंघान् ॥ ब्रह्माणमीशं कम
लासनस्थमृषींश्च सर्वानुरगांश्च दिव्या
न् ॥१५॥ अनेकबाहूदरवक्त्रनेत्रं पश्या
मि त्वां सर्वतोऽनंतरूपम् ॥ नांतं न म

ध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर
विश्वरूपम् ॥ १६ ॥ किरीटिनं गदिनं
चक्रिणं च तेजोराशिं सर्वतो दीप्तिमं
तम् ॥ पश्यामि त्वां दुर्निरीक्ष्यं समंता
द् दीप्तानलार्कद्युतिमप्रमेयम् ॥१७॥
त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्व
स्य परं निधानम् ॥ त्वमव्ययः शाश्वत

धर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे
॥ १८ ॥ अनादिमध्यांतमनंतवीर्यमनं
तबाहुं शशिसूर्यनेत्रम् ॥ पश्यामि त्वां
दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं त
पंतम् ॥ १९ ॥ द्यावापृथिव्योरिदमंतरं
हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ॥ दृ
ष्ट्वाऽद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्य

थितं महात्मन् ॥२०॥ अमी हि त्वां सु
रसंघा विशंति केचिद्भीताः प्रांजलयो
गृणंति ॥ स्वस्तीत्युक्त्वा महर्षिसिद्धसं
घाःस्तुवंति त्वां स्तुतिभिः पुष्कलाभिः
॥२१॥ रुद्रादित्या वसवो ये च साध्या
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ॥ गंधर्व
यक्षासुरसिद्धसंघा वीक्षंते त्वां विस्मि

ताश्चैव सर्वे ॥ २२ ॥ रूपं महत्ते बहुव
क्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ॥ ब
हूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्र
व्यथितास्तथाऽहम् ॥ २३ ॥ नभःस्पृशं
दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशाल
नेत्रम् ॥ दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा
धृतिं न विंदामि शमं च विष्णो ॥ २४ ॥

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव का
लानलसंनिभानि ॥ दिशो न जाने न
लभे च शर्म प्रसीद देवेश जगन्निवास
॥ २५ ॥ अमी च त्वां धृतराष्ट्रस्य पु
त्राः सर्वे सहैवावनिपालसंघैः ॥ भीष्मो
द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैर
पि योधमुख्यैः॥२६॥ वक्त्राणि ते त्वरमा

णा विशंति दंष्ट्राकरालानि भयानका
नि ॥ केचिद्विलग्ना दशनांतरेषु संदृश्यं
ते चूर्णितैरुत्तमांगैः॥ २७॥ यथा नदी
नां बहवोंऽबुवेगाः समुद्रमेवाभिमुखा
द्रवंति ॥ तथा तवामी नरलोकवीरा वि
शंति वक्त्राण्यभिविज्वलंति ॥ २८ ॥
यथा प्रदीप्तं ज्वलनं पतंगा विशंति ना

शाय समृद्धवेगाः ॥ तथैव नाशाय वि
शंति लोकास्तवापि वक्त्राणि समृद्धवे
गाः ॥ २९ ॥ लेलिह्यसे ग्रसमानः समं
ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ॥ ते
जोभिरापूर्य जगत्समग्रं भासस्तवोग्राः
प्रतपंति विष्णो॥ ३० ॥आख्याहि मे को
भवानुग्ररूपो नमोऽस्तु ते देववर प्र

सीद ॥ विज्ञातुमिच्छामि भवंतमाद्यं
न हि प्रजानामि तव प्रवृत्तिम् ॥३१॥
श्रीभगवानुवाच ॥ कालोऽस्मि लोक
क्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्र
वृत्तः ॥ ऋतेऽपि त्वां न भविष्यंति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः॥३२॥
तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा

शत्रून्भुंक्ष्व राज्यं समृद्धम्॥मयैवैते निहताः पूर्वमेव निमित्तमात्रं भवसव्यसाचिन्॥ ३३ ॥ द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान् ॥ मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेताऽसि रणे सपत्नान् ॥ ३४ ॥ संजय उवाच ॥ एतच्छ्रुत्वा वचनं के

शवस्य कृतांजलिर्वेपमानः किरीटी ॥
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं
भीतभीतः प्रणम्य ॥ ३५ ॥ अर्जुन उ
वाच ॥ स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च ॥ रक्षांसि
भीतानि दिशो द्रवंति सर्वे नमस्यंति च
सिद्धसंघाः ॥ ३६ ॥ कस्माच्च ते न न

मेरन्महात्मन् गरीयसे ब्रह्मणोऽप्या
दिकर्त्रे ॥ अनंत देवेश जगन्निवास त्व
मक्षरं सदसत्तत्परं यत् ॥ ३७॥ त्वमा
दिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य
परं निधानम् ॥ वेत्ताऽसि वेद्यं च परं च
धाम त्वया ततं विश्वमनंतरूप ॥ ३८॥
वायुर्यमोऽग्निर्वरुणः शशांकः प्रजाप

तिस्त्वं प्रपितामहश्च ॥ नमो नमस्ते
ऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि न
मोनमस्ते ॥३९॥ नमः पुरस्तादथ पृष्ठत
स्ते नमोऽस्तु ते सर्वत एव सर्व ॥ अनं
तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि
ततोऽसि सर्वः ॥ ४० ॥ सखेति मत्वा
प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखे

ति ॥ अजानता महिमानं तवेदं मया
प्रमादात्प्रणयेन वापि ॥ ४१ ॥ यच्चाव
हासार्थमसत्कृतोऽसि विहारशय्यासन
भोजनेषु ॥ एकोऽथ वाप्यच्युत तत्सम
क्षं तत्क्षामये त्वामहमप्रमेयम् ॥४२॥
पितासि लोकस्य चराचरस्य त्वमस्य पू ३५
ज्यश्च गुरुर्गरीयान् ॥ न त्वत्समोऽस्त्य

भ्याधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रति
मप्रभावः ॥ ४३ ॥ तस्मात्प्रणम्य प्र
णिधाय कायं प्रसादये त्वामहमीश
मीड्यम् ॥ पितेव पुत्रस्य सखेव सख्युः
प्रियः पियायार्हसि देव सोढुम् ॥४४॥
अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च
प्रव्यथितं मनो मे ॥ तदेव मे दर्शय दे

व रूपं प्रसीद देवेश जगन्निवास ॥४५॥
किरीटिनं गदिनं चक्रहस्तमिच्छामि
त्वां द्रष्टुमहं तथैव ॥ तेनैव रूपेण चतुर्भु
जेन सहस्रबाहो भव विश्वमूर्ते ॥४६॥
श्रीभगवानुवाच ॥ मया प्रसन्नेन तवा
र्जुनेदं रूपं परं दर्शितमात्मयोगात् ॥
तेजोमयं विश्वमनंतमाद्यं यन्मे त्वद

न्येन न दृष्टपूर्वम् ॥४७॥ न वेदयज्ञा
ध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभि
रुग्रैः ॥ एवंरूपः शक्य अहं नृलोके द्र
ष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८॥ मा ते
व्यथा मा च विमूढभावो दृष्ट्वा रूपं
घोरमीदृङ्ममेदम् ॥ व्यपेतभीः प्रीतम
नाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य

॥ ४९ ॥ संजय उवाच ॥ इत्यर्जुनं वासु
देवस्तथोक्त्वा स्वकं रूपं दर्शयामास
भूयः ॥ आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ५० ॥
अर्जुन उवाच ॥ दृष्ट्वेदं मानुषं रूपं त
व सौम्यं जनार्दन ॥ इदानीमस्मि संवृ
त्तः सचेताः प्रकृतिं गतः ॥ ५१ ॥ श्री

भगवानुवाच ॥ सुदुर्दर्शमिदं रूपं दृष्ट
वानसि यन्मम ॥ देवा अप्यस्य रूपस्य
नित्यं दर्शनकांक्षिणः ॥५२॥ नाहं वेदै
र्न तपसा न दानेन न चेज्यया ॥ श
क्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा
॥५३॥ भक्त्या त्वनन्यया शक्य अहमे
वंविधोऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्त्वेन प्रवे

ष्टुं च परंतप ॥५४॥ मत्कर्मकृन्मत्परमो
मद्भक्तः संगवर्जितः ॥ निर्वैरः सर्वभूते
षु यः स मामेति पांडव ॥५५॥ इति श्री
मद्भगवद्गीतासूपनिषत्सु ब्रह्म० विश्व
रूपदर्शनं नामैकादशोऽध्यायः ॥ ११ ॥
अर्जुन उवाच ॥ एवं सततयुक्ता ये भ
क्तास्त्वां पर्युपासते ॥ ये चाप्यक्षरमव्य

क्तं तेषां के योगवित्तमाः ॥ १ ॥ श्रीभ
गवानुवाच ॥ मय्यावेश्य मनो ये मां
नित्ययुक्ता उपासते ॥ श्रद्धया परयो
पेतास्ते मे युक्ततमा मताः ॥ २ ॥ ये
त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ॥ स
र्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवम्
॥ ३ ॥ संनियम्येंद्रियग्रामं सर्वत्र सम

बुद्धयः॥ते प्राप्नुवन्ति मामेव सर्वभूतहि
ते रताः ॥ ४ ॥ क्लेशोधिकतरस्तेषाम
व्यक्तासक्तचेतसाम् ॥ अव्यक्ता हि ग
तिर्दुःखं देहवद्भिरवाप्यते ॥५॥ ये तु स
र्वाणि कर्माणि मयि संन्यस्य मत्पराः॥
अनन्येनैव योगेन मां ध्यायंत उपास
ते ॥ ६ ॥ तेषामहं समुद्धर्ता मृत्युसंसा

रसागरात् ॥ भवामि न चिरात्पार्थ म
य्यावेशितचेतसाम् ॥७॥ मय्येव मन
आधत्स्व मयि बुद्धिं निवेशय॥ निवसि
ष्यसि मय्येव अत ऊर्ध्वं न संशयः
॥ ८॥ अथ चित्तं समाधातुं न शक्नोषि
मयि स्थिरम्॥ अभ्यासयोगेन ततो मा
मिच्छाप्तुं धनंजय ॥ ९॥ अभ्यासेऽप्य

समर्थोऽसि मत्कर्मपरमो भव ॥ मदर्थ
मपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि
॥ १० ॥ अथैतदप्यशक्तोऽसि कर्तुं म
द्योगमाश्रितः ॥सर्वकर्मफलत्यागं ततः
कुरु यतात्मवान् ॥ ११ ॥ श्रेयो हि ज्ञा
नमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ॥
ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिर

नंतरम् ॥ १२ ॥ अद्वेष्टा सर्वभूतानां
मैत्रः करुण एव च ॥ निर्ममो निरहं
कारः समदुःखसुखः क्षमी ॥१३॥ संतु
ष्टः सततं योगी यतात्मा दृढनिश्चयः ॥
मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे
प्रियः ॥ १४ ॥ यस्मान्नोद्विजते लोको
लोकान्नोद्विजते च यः ॥ हर्षामर्षभयो

द्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५ ॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्य
थः ॥ सर्वारंभपरित्यागी यो मद्भक्तः स
मे प्रियः ॥१६॥ यो न हृष्यति न द्वेष्टि
न शोचति न कांक्षति ॥ शुभाशुभपरि
त्यागी भक्तिमान्यः स मे प्रियः॥१७॥
समः शत्रौ च मित्रे च तथा मानाप

मानयोः ॥ शीतोष्णसुखदुःखेषु समः
संगविवर्जितः ॥ १८ ॥ तुल्यनिंदास्तु
तिर्मौनी संतुष्टो येनकेनचित् ॥ अनि
केतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः
॥१९॥ येतु धर्म्यामृतमिदं यथोक्तं पर्यु
पासते ॥ श्रद्दधाना मत्परमा भक्तास्ते
ऽतीव मे प्रियाः ॥२०॥ इति श्रीमद्भग

वङ्गीतासूपनिषत्सुब्रह्मविद्यायां०भक्ति योगोनाम द्वादशोऽध्यायः ॥ १२ ॥

इति द्वितीयमुपासनाषट्कं समाप्तं ॥

॥अथ तृतीयं ज्ञानपदं प्रारभ्यते॥

गी. १

अत्र क्षिप्तः ॥ अर्जुन उवाच ॥ प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ॥ एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव ॥ १ ॥ श्रीभगवानुवाच ॥ इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते ॥ एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ १ ॥ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भा

अ. १३ १

रत ॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं
मतं मम ॥ २ ॥ तत्क्षेत्रं यच्च यादृक्
च यद्विकारि यतश्च यत् ॥ स च यो
यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥
ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः
पृथक् ॥ ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्वि
निश्चितैः ॥ ४ ॥ महाभूतान्यहंकारो बु

द्धिरव्यक्तमेव च ॥ इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः॥५॥इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ॥ एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ६ ॥ अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवम् ॥ आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७ ॥ इंद्रियार्थेषु वैरा

ग्यमनहंकार एव च ॥ जन्ममृत्युजरा
व्याधिदुःखदोषानुदर्शनम् ॥ ८ ॥ अ
सक्तिरनभिष्वंगः पुत्रदारगृहादिषु ॥
नित्यं च समचित्तत्वमिष्टानिष्टोपप
त्तिषु ॥ ९ ॥ मयि चानन्ययोगेन भ
क्तिरव्यभिचारिणी ॥ विविक्तदेशसेवि
त्वमरतिर्जनसंसदि ॥ १० ॥ अध्यात्म

ज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ॥
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतो
ऽन्यथा ॥ ११ ॥ ज्ञेयं यत्तत्प्रवक्ष्यामि
यज्ज्ञात्वाऽमृतमश्नुते ॥ अनादिमत्प
रं ब्रह्म न सत्तन्नासदुच्यते ॥ १२॥ स
र्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमु
खम् ॥ सर्वतः श्रुतिमल्लोके सर्वमावृत्य

तिष्ठति ॥ १३॥ सर्वेंद्रियगुणाभासं सर्वे
द्रियविवर्जितम् ॥ असक्तं सर्वभृच्चैव नि
र्गुणं गुणभोक्तृ च ॥ १४॥ बहिरंतश्च भू
तानामचरं चरमेव च ॥ सूक्ष्मत्वात्तद
विज्ञेयं दूरस्थं चांतिके च तत् ॥ १५॥
अविभक्तं च भूतेषु विभक्तमिव च
स्थितम् ॥ भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु

प्रभविष्णु च॥ १६॥ ज्योतिषामपि त
ज्ज्योतिस्तमसः परमुच्यते॥ ज्ञानं ज्ञेयं
ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम्॥१७॥
इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समास
तः॥मद्भक्त एतद्विज्ञाय मद्भावायोपप
द्यते॥१८॥प्रकृतिं पुरुषं चैव विद्ध्यनादी
उभावपि॥ विकारांश्च गुणांश्चैव विद्धि

प्रकृतिसंभवान् ॥ १९ ॥ कार्यकारणक
र्तृत्वे हेतुः प्रकृतिरुच्यते ॥ पुरुषः सुख
दुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥
पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गु
णान् ॥ कारणं गुणसंगोऽस्य सदसद्यो
निजन्मसु ॥ २१ ॥ उपद्रष्टानुमंता च
भर्ता भोक्ता महेश्वरः ॥ परमात्मेति

चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥२२॥
य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ॥
सर्वथा वर्तमानोऽपि न स भूयोऽभिजा
यते ॥ २३ ॥ ध्यानेनात्मनि पश्यंति
केचिदात्मानमात्मना ॥ अन्ये सांख्ये
न योगेन कर्मयोगेन चापरे ॥ २४ ॥
अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उ

पासते ॥ तेऽपि चातितरंत्येव मृत्युं श्रु
तिपरायणाः ॥२५॥ यावत्संजायते किं
चित्सत्त्वं स्थावरजंगमम् ॥ क्षेत्रक्षेत्रज्ञ
संयोगात्तद्विद्धि भरतर्षभ ॥ २६ ॥ स
मं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरम् ॥ वि
नश्यत्स्वविनश्यंतं यः पश्यति स पश्य
ति ॥ २७ ॥ समं पश्यन् हि सर्वत्र स

मवस्थितमीश्वरम् ॥ न हिनस्त्यात्म
नाऽऽत्मानं ततो याति परां गतिम्
॥ २८ ॥ प्रकृत्यैव च कर्माणि क्रियमा
णानि सर्वशः ॥ यः पश्यति तथात्मा
नमकर्तारं स पश्यति ॥ २९ ॥ यदा भू
तपृथग्भावमेकस्थमनुपश्यति ॥ तत
एव च विस्तारं ब्रह्म संपद्यते तदा

॥ ३० ॥ अनादित्वान्निर्गुणत्वात्परमा
त्मायमव्ययः ॥ शरीरस्थोऽपि कौंतेय
न करोति न लिप्यते ॥ ३१ ॥ यथा सर्व
गतं सौक्ष्म्यादाकाशं नोपलिप्यते ॥ स
र्वत्रावस्थितो देहे तथात्मा नोपलिप्य
ते ॥ ३२ ॥ यथा प्रकाशयत्येकः कृत्स्नं
लोकमिमं रविः ॥ क्षेत्रं क्षेत्री तथा कृ

त्स्नं प्रकाशयति भारत ॥ ३३ ॥ क्षेत्रक्षे
त्रज्ञयोरेवमंतरं ज्ञानचक्षुषा ॥ भूतप्रकृ
तिमोक्षं च ये विदुर्यांति ते परम् ॥३४॥
इति श्रीमद्भगव०क्षेत्रक्षेत्रज्ञविभागयो
गो नाम त्रयोदशोऽध्यायः ॥ १३ ॥
श्रीभगवानुवाच ॥ परं भूयः प्रवक्ष्यामि
ज्ञानानां ज्ञानमुत्तमम् ॥ यज्ज्ञात्वा मु

नयः सर्वे परां सिद्धिमितो गताः ॥ १ ॥
इदं ज्ञानमुपाश्रित्य मम साधर्म्यमाग
ताः ॥ सर्गेऽपि नोपजायंते प्रलये न
व्यथंति च ॥ २ ॥ मम योनिर्महद्ब्रह्म
तस्मिन् गर्भं दधाम्यहम् ॥ संभवः स
र्वभूतानां ततो भवति भारत ॥ ३ ॥ स
र्वयोनिषु कौंतेय मूर्तयः संभवंति याः ॥

तासां ब्रह्म महद्योनिरहं बीजप्रदः पि
ता ॥ ४ ॥ सत्वं रजस्तम इति गुणाः
प्रकृतिसंभवाः ॥ निबध्नंति महाबाहो
देहे देहिनमव्ययम् ॥ ५ ॥ तत्र सत्वं नि
र्मलत्वात्प्रकाशकमनामयम् ॥ सुखसं
गेन बध्नाति ज्ञानसंगेन चानघ ॥ ६ ॥
रजो रागात्मकं विद्धि तृष्णासंगसमुद्भ

वम् ॥ तन्निबध्नाति कौंतेय कर्मसंगेन दे
हिनम् ॥ ७ ॥ तमस्त्वज्ञानजं विद्धि
मोहनं सर्वदेहिनाम् ॥ प्रमादालस्य
निद्राभिस्तन्निबध्नाति भारत ॥ ८ ॥ स
त्वं सुखे संजयति रजः कर्मणि भारत॥
ज्ञानमावृत्य तु तमः प्रमादे संजयत्यु
त ॥ ९ ॥ रजस्तमश्चाभिभूय सत्वं भ

वति भारत ॥ रजः सत्वं तमश्चैव तमः
सत्वं रजस्तथा ॥ १० ॥ सर्वद्वारेषु दे
हेऽस्मिन्प्रकाश उपजायते॥ ज्ञानं यदा
तदा विद्याद्विवृद्धं सत्वमित्युत ॥ ११ ॥
लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृ
हा ॥ रजस्येतानि जायंते विवृद्धे भरत
र्षभ ॥१२॥ अप्रकाशोऽप्रवृत्तिश्च प्रमा

दो मोह एव च ॥ तमस्येतानि जायंते
विवृद्धे कुरुनंदन ॥ १३ ॥ यदा सत्वे प्र
वृद्धे तु प्रलयं याति देहभृत् ॥ तदोत्त
मविदांलोकानमलान्प्रतिपद्यते॥१४॥
रजसि प्रलयं गत्वा कर्मसंगिषु जायते
तथा प्रलीनस्तमसि मूढयोनिषु जायते
॥ १५ ॥ कर्मणः सुकृतस्याहुः सात्वि

कं निर्मलं फलम् ॥ रजसस्तु फलं दुः
खमज्ञानं तमसः फलम् ॥ १६ ॥ सत्वा
त्संजायते ज्ञानं रजसो लोभ एव च ॥
प्रमादमोहौ तमसो भवतोऽज्ञानमे
व च ॥ १७ ॥ ऊर्ध्वं गच्छंति सत्वस्था
मध्ये तिष्ठंति राजसाः ॥ जघन्यगुणवृ
त्तिस्था अधो गच्छंति तामसाः ॥ १८ ॥

किं = मम प्रभो तातपादा
गुणानतीतानतीता महांति
कीदृक्षा = कीदृक्षा कीदृक्षा
= २० = अर्जुन उवाच
तमसस्तुजगद्गाढं; सर्वमुक्तोऽसतमूढ़ो
ऊ = दृष्टसमर्थवान्
तीर्थ कीदृक्षा
गुणानतीतान = ११ =
साडाएकादशेति
इयति गुणस्थान पे
नाथ गुणैर्यः कर्तारं यदा दृश्यानुप

माचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥ २१ ॥ श्रीभगवानुवाच ॥ प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव ॥ न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥ २२ ॥ उदासीनवदासीनो गुणैर्यो न विचाल्यते ॥ गुणा वर्तंत इत्येव योऽवतिष्ठति नेंगते ॥ २३ ॥ समदुः

खसुखः स्वस्थः समलोष्टाश्मकांचनः॥
तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसं
स्तुतिः॥ २४॥ मानापमानयोस्तुल्य
स्तुल्यो मित्रारिपक्षयोः॥ सर्वारंभप
रित्यागी गुणातीतः स उच्यते॥ २५॥
मां च योऽव्यभिचारेण भक्तियोगेन
सेवते॥ स गुणान्समतीत्यैतान् ब्रह्म

भूयाय कल्पते ॥ २६ ॥ ब्रह्मणो हि
प्रतिष्ठाहममृतस्याव्ययस्य च ॥ शाश्व
तस्य च धर्मस्य सुखस्यैकांतिकस्य च
॥२७॥इति श्रीमद्भगव०गुणत्रयविभा
गयोगो नाम चतुर्दशोऽध्यायः॥ १४॥
श्रीभगवानुवाच॥ ऊर्ध्वमूलमधःशाख
मश्वत्थं प्राहुरव्ययम् ॥ छंदांसि यस्य

पर्णानि यस्तं वेद स वेदवित् ॥१॥ अध
श्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा वि
षयप्रवालाः ॥ अधश्च मूलान्यनुसंतता
नि कर्मानुबंधीनि मनुष्यलोके ॥ २ ॥
न रूपमस्येह तथोपलभ्यते नांतो न
चादिर्न च संप्रतिष्ठा ॥ अश्वत्थमेनं सु
विरूढमूलमसंगशस्त्रेण दृढेन छित्त्वा

॥ ३ ॥ ततः पदं तत्परिमार्गितव्यं य
स्मिन्गता न निवर्तंति भूयः ॥ तमेव
चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता
पुराणी ॥ ४॥ निर्मानमोहा जितसंगदो
षा अध्यात्मनित्या विनिवृत्तकामाः ॥
द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमू
ढाः पदमव्ययंतत् ॥५॥ न तद्भासयते सू

यों न शशांको न पावकः ॥ यद्गत्वा न
निवर्तंते तद्धाम परमं मम ॥६॥ ममैवां
शो जीवलोके जीवभूतः सनातनः ॥ म
नःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्ष
ति॥७॥शरीरं यदवाप्नोति यच्चाप्युत्क्रा
मतीश्वरः॥गृहीत्वैतानि संयाति वायुर्गं
धानिवाशयात् ॥८॥श्रोत्रं चक्षुः स्पर्श

नं च रसनं घ्राणमेव च ॥ अधिष्ठाय मन
श्चायं विषयानुपसेवते ॥९॥ उत्क्रामंतं
स्थितं वापि भुंजानं वा गुणान्वितम् ॥ वि
मूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः
॥१०॥ यतंतो योगिनश्चैनं पश्यंत्यात्म
न्यवस्थितम्॥ यतंतोऽप्यकृतात्मानो नै
नं पश्यंत्यचेतसः ॥११॥ यदादित्यगतं

तेजो जगद्भासयतेऽखिलम् ॥ यच्चंद्रम
सि यच्चाग्नौ तत्तेजो विद्धि मामकम्
॥ १२ ॥ गामाविश्य च भूतानि धार
याम्यहमोजसा ॥ पुष्णामि चौषधीः
सर्वाः सोमो भूत्वा रसात्मकः ॥ १३ ॥
अहं वैश्वानरो भूत्वा प्राणिनां देहमा
श्रितः ॥ प्राणापानसमायुक्तः पचाम्यन्नं

चतुर्विधम् ॥ १४॥ सर्वस्य चाहं हृदिस
न्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च
वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदवि
देव चाहम् ॥ १५॥ द्वाविमौ पुरुषौ लो
के क्षरश्चाक्षर एव च ॥ क्षरः सर्वाणि
भूतानि कूटस्थोऽक्षर उच्यते ॥ १६ ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृ

तः॥ यो लोकत्रयमाविश्य बिभर्त्यव्य
य ईश्वरः ॥१७॥ यस्मात्क्षरमतीतोऽह
मक्षरादपि चोत्तमः ॥ अतोऽस्मि लो
के वेदे च प्रथितः पुरुषोत्तमः ॥ १८ ॥
यो मामेवमसंमूढो जानाति पुरुषोत्त
मम्॥ स सर्वविद्भजति मां सर्वभावेन
भारत ॥ १९ ॥ इति गुह्यतमं शास्त्रमि

दमुक्तं मयानघ ॥ एतद्बुद्ध्वा बुद्धिमा
न् स्यात्कृतकृत्यश्च भारत ॥ २० ॥ इ
ति श्रीमद्भगवद्गीतासू०पुरुषोत्तमयो
गो नाम पंचदशोऽध्यायः ॥ १५ ॥
श्रीभगवानुवाच ॥ अभयं सत्वसंशुद्धि
र्ज्ञानयोगव्यवस्थितिः ॥ दानं दमश्च य
ज्ञश्च स्वाध्यायस्तप आर्जवम् ॥१॥ अ

हिंसा सत्यमक्रोधस्त्यागः शांतिरपैशु
नम् ॥ दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीर
चापलम् ॥ २॥ तेजः क्षमा धृतिः शौच
मद्रोहो नातिमानिता ॥ भवंति संपदं
दैवीमभिजातस्य भारत ॥ ३ ॥ दंभो द
र्पोऽभिमानश्च क्रोधः पारुष्यमेव च ॥
अज्ञानं चाभिजातस्य पार्थ संपदमासु

रीम् ॥ ४ ॥ दैवी संपद्विमोक्षाय निबं
धायासुरी मता ॥ मा शुचः संपदं दैवी
मभिजातोऽसि पांडव ॥ ५ ॥ द्वौ भूत
सर्गौ लोकेऽस्मिन्दैव आसुर एव च ॥
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृ
णु ॥ ६ ॥ प्रवृत्तिंच निवृत्तिंच जना न वि
दुरासुराः ॥ न शोचं नापि चाचारो न

सत्यं तेषु विद्यते ॥७॥ असत्यमप्रतिष्ठं
ते जगदाहुरनीश्वरम् ॥ अपरस्परसंभूतं
किमन्यत्कामहैतुकम् ॥ ८ ॥ एतां दृष्टि
मवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ॥ प्रभ
वंत्युग्रकर्माणः क्षयाय जगतोऽहिताः
॥ ९ ॥ काममाश्रित्य दुष्पूरं दंभमान
मदान्विताः॥ मोहाद्गृहीत्वाऽसद्ग्राहा

न्प्रवर्तंतेऽशुचिव्रताः ॥ १० ॥ चिंताम
परिमेयां च प्रलयांतामुपाश्रिताः ॥ का
मोपभोगपरमा एतावदिति निश्चिताः
॥ ११ ॥ आशापाशशतैर्बद्धाः कामक्रो
धपरायणाः॥ ईहंते कामभोगार्थमन्या
येनार्थसंचयान् ॥ १२ ॥ इदमद्य मया
लब्धमिमं प्राप्स्ये मनोरथम्॥ इदमस्ती

दमपि मे भविष्यति पुनर्धनम् ॥ १३ ॥
असौ मया हतः शत्रुर्हनिष्ये चापरान
पि ॥ ईश्वरोऽहमहं भोगी सिद्धोऽहं ब
लवान्सुखी ॥ १४ ॥ आढ्योऽभिजन
वानस्मि कोऽन्योऽस्ति सदृशो मया ॥
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानवि
मोहिताः ॥ १५ ॥ अनेकचित्तविभ्रांता

मोहजालसमावृताः ॥ प्रसक्ताः काम
भोगेषु पतंति नरकेऽशुचौ ॥ १६ ॥ आ
त्मसंभाविताः स्तब्धा धनमानमदा
न्विताः ॥ यजंते नामयज्ञैस्ते दंभेना
विधिपूर्वकम् ॥ १७ ॥ अहंकारं बलं द
र्पं कामं क्रोधं च संश्रिताः ॥ मामात्म
परदेहेषु प्रद्विषंतोऽभ्यसूयकाः ॥ १८ ॥

तानहं द्विषतः क्रूरान्संसारेषु नराधमा
न् ॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव
योनिषु ॥ १९॥आसुरीं योनिमापन्ना मू
ढा जन्मनि जन्मनि ॥ मामप्राप्यैव कौं
तेय ततो यांत्यधमां गतिम् ॥२०॥ त्रि
विधं नरकस्येदं द्वारं नाशनमात्मनः ॥
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं

त्यजेत् ॥ २१ ॥ एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः ॥ आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥ २२ ॥ यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ॥ न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥ २३ ॥ तस्माच्छास्त्रं प्रमाणंते कार्याकार्यव्यवस्थितौ ॥ ज्ञात्वा शा

स्त्रविधानोक्तंकर्मकर्तुमिहार्हसि॥२४॥
इति श्रीमद्भगवद्गी०दैवासुरसंपद्विभा
गयोगो नाम षोडशोऽध्यायः ॥१६॥
अर्जुन उवाच॥ ये शास्त्रविधिमुत्सृज्य
यजंते श्रद्धयाऽन्विताः॥ तेषां निष्ठा
तु का कृष्ण सत्वमाहो रजस्तमः॥ १॥
श्रीभगवानुवाच॥ त्रिविधा भवति श्र

द्धा देहिनां सा स्वभावजा ॥ सात्विकी
राजसी चैव तामसी चेति तां शृणु॥२॥
सत्वानुरूपा सर्वस्य श्रद्धा भवति भार
त ॥ श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः
स एव सः ॥ ३ ॥ यजंते सात्विका दे
वान्यक्षरक्षांसि राजसाः ॥ प्रेतान्भूत
गणांश्चान्ये यजंते तामसा जनाः॥ ४ ॥

अशास्त्रविहितं घोरं तप्यंते ये तपो ज
नाः ॥ दंभाहंकारसंयुक्ताः कामरागब
लान्विताः ॥ ५ ॥ कर्षयंतः शरीरस्थं भू
तग्राममचेतसः ॥ मां चैवांतःशरीरस्थं
तान्विद्ध्यासुरनिश्चयान् ॥ ६ ॥ आहा
रस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ॥
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृ

णु ॥ ७ ॥ आयुः सत्वबलारोग्यसुखप्री
तिविवर्धनाः ॥ रस्याः स्निग्धाः स्थिरा
हृद्या आहाराः सात्विकप्रियाः ॥ ८ ॥
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहि
नः ॥ आहारा राजसस्येष्टा दुःखशो
कामयप्रदाः ॥ ९ ॥ यातयामं गतरसं
पूति पर्युषितं च यत् ॥ उच्छिष्टमपि

चामेध्यं भोजनं तामसप्रियम् ॥ १० ॥
अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इ
ज्यते ॥ यष्टव्यमेवेति मनः समाधाय
स सात्विकः ॥ ११ ॥ अभिसंधाय तु
फलं दंभार्थमपि चैव यत् ॥ इज्यते भ
रतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ १२ ॥
विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिण

म् ॥ श्रद्धाविरहितं यज्ञं तामसं परिच
क्षते ॥ १३ ॥ देवद्विजगुरुप्राज्ञपूजनं
शौचमार्जवम् ॥ ब्रह्मचर्यमहिंसा च शा
रीरं तप उच्यते ॥ १४ ॥ अनुद्वेगकरं
वाक्यं सत्यं प्रियहितं च यत् ॥ स्वा
ध्यायाभ्यसनं चैव वाङ्मयं तप उच्य
ते ॥ १५ ॥ मनःप्रसादः सौम्यत्वं मौ

नमात्मविनिग्रहः ॥ भावसंशुद्धिरित्ये
तत्तपो मानसमुच्यते ॥ १६ ॥ श्रद्धया
परया तप्तं तपस्तत्त्रिविधं नरैः ॥ अफ
लाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते
॥ १७ ॥ सत्कारमानपूजार्थं तपो दंभे
न चैव यत् ॥ क्रियते तदिह प्रोक्तं रा
जसं चलमध्रुवम् ॥ १८ ॥ मूढग्राहेणात्म

नो यत्पीडया क्रियते तपः॥ परस्योत्सा
दनार्थं वा तत्तामसमुदाहृतम् ॥ १९ ॥
दातव्यमिति यद्दानं दीयतेऽनुपकारि
णे ॥ देशे काले च पात्रे च तद्दानं सा
त्विकं स्मृतम् ॥ २० ॥ यत्तु प्रत्युपका
रार्थं फलमुद्दिश्य वा पुनः ॥ दीयते च
परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥ २१ ॥

अदेशकाले यद्दानमपात्रेभ्यश्च दीय
ते ॥ असत्कृतमवज्ञातं तत्तामसमुदाहृ
तम् ॥ २२ ॥ ॐतत्सदिति निर्देशो ब्र
ह्मणस्त्रिविधः स्मृतः ॥ ब्राह्मणास्तेन वे
दाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥ त
स्मादोमित्युदाहृत्य यज्ञदानतपःक्रि
याः ॥ प्रवर्तंते विधानोक्ताः सततं ब्रह्म

वादिनाम् ॥ २४ ॥ तदित्यनभिसंधाय
फलं यज्ञतपः क्रियाः ॥ दानक्रियाश्च वि
विधाः क्रियंते मोक्षकांक्षिभिः ॥ २५ ॥
सद्भावे साधुभावे च सदित्येतत्प्रयुज्य
ते ॥ प्रशस्ते कर्मणि तथा सच्छब्दः पा
र्थ युज्यते ॥ २६ ॥ यज्ञे तपसि दाने च २५
स्थितिः सदिति चोच्यते ॥ कर्म चैव त

दर्थीयं सदित्येवाभिधीयते ॥ २७ ॥ अ
श्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ॥
असदित्युच्यते पार्थ न च तत्प्रेत्य नो
इह ॥२८॥ इति श्रीमद्भगव०श्रद्धात्रय
विभागयो०सप्तदशोऽध्यायः ॥ १७ ॥
अर्जुन उवाच ॥ संन्यासस्य महाबाहो
तत्त्वमिच्छामि वेदितुम् ॥ त्यागस्य च

हृषीकेश पृथक्केशिनिषूदन ॥ १ ॥ श्री
भगवानुवाच ॥ काम्यानां कर्मणां न्या
सं संन्यासं कवयो विदुः ॥ सर्वकर्मफ
लत्यागं प्राहुस्त्यागं विचक्षणाः ॥२॥
त्याज्यं दोषवदित्येके कर्म प्राहुर्मनी
षिणः ॥ यज्ञदानतपः कर्म न त्याज्य
मिति चापरे ॥ ३ ॥ निश्चयं शृणु मे त

त्र त्यागे भरतसत्तम ॥ त्यागो हि पुरु
षव्याघ्र त्रिविधः संप्रकीर्तितः ॥ ४ ॥ य
ज्ञदानतपः कर्म न त्याज्यं कार्यमेव त
त् ॥ यज्ञो दानं तपश्चैव पावनानि म
नीषिणाम् ॥ ५ ॥ एतान्यपि तु कर्मा
णि संगं त्यक्त्वा फलानि च ॥ कर्तव्या
नीति मे पार्थ निश्चितं मतमुत्तमम् ॥ ६ ॥

नियतस्य तु संन्यासः कर्मणो नोपपद्य
ते ॥ मोहात्तस्य परित्यागस्तामसः परि
कीर्तितः ॥ ७ ॥ दुःखमित्येव यत्कर्म
कायक्लेशभयात्त्यजेत् ॥ स कृत्वा रा
जसं त्यागं नैव त्यागफलं लभेत् ॥ ८ ॥
कार्यमित्येव यत्कर्म नियतं क्रियते
ऽर्जुन ॥ संगं त्यक्त्वा फलं चैव स त्या

गः सात्विको मतः ॥ ९ ॥ न द्वेष्ट्यकु
शलं कर्म कुशले नानुषज्जते ॥ त्यागी
सत्वसमाविष्टो मेधावी छिन्नसंशयः
॥ १० ॥ नहि देहभृता शक्यं त्यक्तुं क
र्माण्यशेषतः ॥ यस्तु कर्मफलत्यागी स
त्यागीत्यभिधीयते ॥ ११ ॥ अनिष्टमि
ष्टं मिश्रं च त्रिविधं कर्मणः फलम् ॥

भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥ १२ ॥ पंचैतानि महाबाहो कारणानि निबोध मे ॥ सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥ १३ ॥ अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ॥ विविधाश्च पृथक् चेष्टा दैवं चैवात्र पंचमम् ॥ १४ ॥ शरी

रवाङ्मनोभिर्यत्कर्म प्रारभते नरः ॥
न्याय्यं वा विपरीतं वा पंचैते तस्य हे
तवः ॥ १५ ॥ तत्रैवं सति कर्तारमात्मा
नं केवलं तु यः ॥ पश्यत्यकृतबुद्धित्वा
न्न स पश्यति दुर्मतिः ॥ १६ ॥ यस्य
नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते॥
हत्वापि स इमाँल्लोकान्न हंति न निब

ह्यते ॥ १७ ॥ ज्ञानं ज्ञेयं परिज्ञाता त्रि
विधा कर्मचोदना ॥ करणं कर्म कर्ते
ति त्रिविधः कर्मसंग्रहः ॥ १८ ॥ ज्ञानं
कर्म च कर्ता च त्रिधैव गुणभेदतः ॥
प्रोच्यते गुणसंख्याने यथावच्छृणु ता
न्यपि ॥ १९ ॥ सर्वभूतेषु येनैकं भाव
मव्ययमीक्षते ॥ अविभक्तं विभक्तेषु त

ज्ज्ञानं विद्धि सात्विकम् ॥ २० ॥ पृथ
क्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्वि
धान् ॥ वेत्ति सर्वेषु भूतेषु तज्ज्ञानं वि
द्धि राजसम् ॥ २१ ॥ यत्तु कृत्स्नवदेक
स्मिन् कार्ये सक्तमहैतुकम् ॥ अतत्त्वा
र्थवदल्पं च तत्तामसमुदाहृतम् ॥२२॥
नियतं संगरहितमरागद्वेषतः कृतम् ॥

अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमु
च्यते ॥ २३ ॥ यत्तु कामेप्सुना कर्म
साहंकारेण वा पुनः ॥ क्रियते बहुला
यासं तद्राजसमुदाहृतम् ॥ २४ ॥ अ
नुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषम्॥
मोहादारभ्यते कर्म यत्तत्तामसमुच्य
ते ॥ २५ ॥ मुक्तसंगोऽनहंवादी धृत्यु

ॐ तामस त्याग कर्ता

विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ १८ ॥

क्रूरः शठो नैष्कृतिकोऽलसः ॥

प्रदीर्घसूत्री च सुखी कर्ता तामस उच्यते ॥ २७ ॥ अयुक्तः प्राकृतः स्तब्धः

शठो नैष्कृतिकोऽलसः ॥ विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥ २८ ॥

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ॥ प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥ २९ ॥

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ॥ बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥ ३० ॥

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ॥ अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥

अधर्मं धर्ममिति या मन्यते तमसावृता ॥ सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ॥ योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥ ३३ ॥

यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन ॥ प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥

यया स्वप्नं भयं शोकं विषादं मदमेव च ॥ न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५ ॥

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ॥ अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥ ३६ ॥

यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ॥ तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥ ३७ ॥

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ॥ परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥ ३८ ॥

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ॥ निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥ ३९ ॥

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ॥ सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ ४० ॥

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप ॥ कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ॥ ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ ४२ ॥

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ॥ दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ ४३ ॥

कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ॥ परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ ४४ ॥

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ॥ स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥ ४५ ॥

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ ४६ ॥

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ॥ स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ ४७ ॥

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ॥ सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥ ४८ ॥

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ॥ नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ४९ ॥

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ॥ समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥ ५० ॥

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ॥ शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१ ॥

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ॥ ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२ ॥

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ॥ विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥ ५३ ॥

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ॥ समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ५४ ॥

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ॥ ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ ५५ ॥

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ॥ मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ ५६ ॥

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ॥ बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ॥ अथ चेत्त्वमहंकारान्न श्रोष्यसि विनङ्क्ष्यसि ॥ ५८ ॥

यदहंकारमाश्रित्य न योत्स्य इति मन्यसे ॥ मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९ ॥

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा ॥ कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥ ६० ॥

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ॥ भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ६१ ॥

तमेव शरणं गच्छ सर्वभावेन भारत ॥ तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६२ ॥

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ॥ विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३ ॥

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ॥ इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ ६४ ॥

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥ अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥

इदं ते नातपस्काय नाभक्ताय कदाचन ॥ न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७ ॥

य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति ॥ भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ॥ भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ ६९ ॥

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ॥ ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥ ७० ॥

श्रद्धावाननसूयश्च शृणुयादपि यो नरः ॥ सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥ ७१ ॥

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ॥ कच्चिदज्ञानसम्मोहः प्रनष्टस्ते धनञ्जय ॥ ७२ ॥

अर्जुन उवाच ॥ नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ॥ स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥ ७३ ॥

सञ्जय उवाच ॥ इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ॥ संवादमिमश्रौषमद्भुतं रोमहर्षणम् ॥ ७४ ॥

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् ॥ योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥ ७५ ॥

राजन्संस्मृत्य संस्मृत्य संवादमिमममद्भुतम् ॥ केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥ ७६ ॥

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ॥ विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः ॥ ७७ ॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ७८ ॥

ॐ तत्सत् ॥ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षसंन्यासयोगो नाम अष्टादशोऽध्यायः ॥ १८ ॥

ॐ तत्सत् ॥ श्रीमद्भगवद्गीता समाप्ता ॥

च्यते ॥ २८ ॥ बुद्धेर्भेदं धृतेश्चैव गुणत
स्त्रिविधं शृणु॥ प्रोच्यमानमशेषेण पृथ
क्त्वेन धनंजय ॥ २९ ॥ प्रवृत्तिं च नि
वृत्तिं च कार्याकार्ये भयाभये ॥ बंधं
मोक्षं च या वेत्ति बुद्धिः सा पार्थ सा
त्त्विकी ॥ ३० ॥ यया धर्ममधर्मं च का
र्यं चाकार्यमेव च ॥ अयथावत्प्रजाना

ति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥ अ
धर्मं धर्ममिति या मन्यते तमसा वृ
ता ॥ सर्वार्थान् विपरीतांश्च बुद्धिः सा
पार्थ तामसी ॥ ३२ ॥ धृत्या यया धा
रयते मनःप्राणेंद्रियक्रियाः ॥ योगेना
व्यभिचारिण्या धृतिः सा पार्थ सात्त्वि
की ॥ ३३ ॥ यया तु धर्मकामार्थान्

धृत्या धारयतेऽर्जुन ॥ प्रसंगेन फला
कांक्षी धृतिः सा पार्थ राजसी ॥३४॥
यया स्वप्नं भयं शोकं विषादं मदमेव
च ॥ न विमुंचति दुर्मेधा धृतिः सा पा
र्थ तामसी ॥ ३५ ॥ सुखं त्विदानीं त्रि
विधं शृणु मे भरतर्षभ ॥ अभ्यासाद्र
मते यत्र दुःखांतं च निगच्छति ॥३६॥

यत्तदग्रे विषमिव परिणामेऽमृतोपम
म् ॥ तत्सुखं सात्विकं प्रोक्तमात्मबु
द्धिप्रसादजम् ॥ ३७ ॥ विषयेंद्रियसं
योगाद्यत्तदग्रेऽमृतोपमम् ॥ परिणामे
विषमिव तत्सुखं राजसं स्मृतम् ॥३८॥
यदग्रे चानुबंधे च सुखं मोहनमात्म
नः ॥ निद्रालस्यप्रमादोत्थं तत्तामसमु

दाहृतम् ॥ ३९ ॥ न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ॥ सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ ४० ॥ ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ॥ कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥ ४१ ॥ शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ॥ ज्ञानं विज्ञानमा

स्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ ४२ ॥
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपला
यनम् ॥ दानमीश्वरभावश्च क्षात्रं कर्म
स्वभावजम्॥४३॥कृषिगोरक्षवाणिज्यं
वैश्यकर्म स्वभावजम्॥ परिचर्यात्मकं
कर्म शूद्रस्यापि स्वभावजम् ॥ ४४ ॥
स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते न

रः ॥ स्वकर्मनिरतः सिद्धिं यथा विंद
ति तच्छृणु ॥ ४५ ॥ यतः प्रवृत्तिर्भूता
नां येन सर्वमिदं ततम् ॥ स्वकर्मणा त
मभ्यर्च्य सिद्धिं विंदति मानवः ॥४६॥
श्रेयान् स्वधर्मो विगुणः परधर्मात्स्व
नुष्ठितात् ॥ स्वभावनियतं कर्म कुर्व
न्नाप्नोति किल्बिषम् ॥ ४७ ॥ सहजं

कर्म कौंतेय सदोषमपि न त्यजेत् ॥
सर्वारंभा हि दोषेण धूमेनाग्निरिवावृ
ताः ॥ ४८ ॥ असक्तबुद्धिः सर्वत्र जि
तात्मा विगतस्पृहः ॥ नैष्कर्म्यासिद्धिं
परमां संन्यासेनाधिगच्छति ॥ ४९ ॥
सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति नि
बोध मे ॥ समासेनैव कौंतेय निष्ठा ज्ञा

नस्य या परा ॥ ५० ॥ बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ॥ शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ५१ ॥ विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ॥ ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ५२ ॥ अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ॥

विमुच्य निर्ममः शांतो ब्रह्मभूयाय क
ल्पते ॥ ५३ ॥ ब्रह्मभूतः प्रसन्नात्मा न
शोचति न कांक्षति ॥ समः सर्वेषु भू
तेषु मद्भक्तिं लभते पराम् ॥ ५४ ॥ भ
क्त्या मामभिजानाति यावान्य श्चास्मि
तत्त्वतः ॥ ततो मां तत्त्वतो ज्ञात्वा वि
शते तदनंतरम् ॥ ५५ ॥ सर्वकर्माण्य

पि सदा कुर्वाणो मद्व्यपाश्रयः ॥ मत्प्र
सादादवाप्नोति शाश्वतं पदमव्ययम् ॥
॥ ५६ ॥ चेतसा सर्वकर्माणि मयि संन्य
स्य मत्परः ॥ बुद्धियोगमुपाश्रित्य म
च्चित्तः सततं भव ॥ ५७ ॥ मच्चित्तः
सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ॥ अ
थ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्य

सि ॥ ५८ ॥ यदहंकारमाश्रित्य न यो
त्स्य इति मन्यसे ॥ मिथ्यैष व्यवसाय
स्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९ ॥
स्वभावजेन कौंतेय निबद्धः स्वेन कर्म
णा ॥ कर्तुं नेच्छसि यन्मोहात्करिष्य
स्यवशोऽपि तत् ॥ ६० ॥ ईश्वरः सर्वभू
तानां हृद्देशेऽर्जुन तिष्ठति ॥ भ्रामयन्स

वभूतानि यंत्रारूढानि मायया ॥६१॥
तमेव शरणं गच्छ सर्वभावेन भारत ॥
तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि
शाश्वतम् ॥ ६२ ॥ इति ते ज्ञानमाख्या
तं गुह्याद्गुह्यतरं मया ॥ विमृश्यैतदशे
षेण यथेच्छसि तथा कुरु॥ ६३ ॥ सर्व
गुह्यतमं भूयः शृणु मे परमं वचः ॥ इ

ष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते
हितम् ॥ ६४ ॥ मन्मना भव मद्भक्तो
मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि
सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥
सर्वधर्मान्परित्यज्य मामेकं शरणं व्र
ज ॥ अहं त्वा सर्वपापेभ्यो मोक्षयि
ष्यामि मा शुचः ॥ ६६ ॥ इदं ते नात

पस्काय नाभक्ताय कदाचन ॥ न चा
शुश्रूषवे वाच्यं न च मां योऽभ्यसूय
ति ॥ ६७ ॥ य इदं परमं गुह्यं मद्भक्ते
ष्वभिधास्यति ॥ भक्तिं मयि परां कृ
त्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥ न
च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृ
त्तमः ॥ भविता न च मे तस्मादन्यः

प्रियतरो भुवि ॥ ६९ ॥ अध्येष्यते च
य इमं धर्म्यं संवादमावयोः ॥ ज्ञान
यज्ञेन तेनाहमिष्टः स्यामिति मे म
तिः ॥ ७० ॥ श्रद्धाविाननसूयश्च शृणु
यादपि यो नरः ॥ सोऽपि मुक्तः शुभाँ
ल्लोकान् प्राप्नुयात्पुण्यकर्मणाम् ॥७१॥
कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेत

सा ॥ कच्चिदज्ञानसंमोहःप्रनष्टस्ते धनं
जय ॥ ७२ ॥ अर्जुन उवाच ॥ नष्टो
मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मया
च्युत ॥ स्थितोऽस्मि गतसंदेहः करिष्ये
वचनं तव ॥७३॥ संजय उवाच ॥ इ
त्यहं वासुदेवस्य पार्थस्य च महात्म ३९
नः ॥ संवादमिममश्रौषमद्भुतं रोमहर्ष

णम् ॥ ७४ ॥ व्यासप्रसादाच्छ्रुतवानेत
द्गुह्यमहं परम् ॥ योगं योगेश्वरात्कृष्णा
त्साक्षात्कथयतः स्वयम् ॥ ७५ ॥ रा
जन्संस्मृत्य संस्मृत्य संवादमिममद्भुत
म् ॥ केशवार्जुनयोः पुण्यं हृष्यामि च
मुहुर्मुहुः ॥७६॥तच्च संस्मृत्य संस्मृत्य
रूपमत्यद्भुतं हरेः ॥ विस्मयो मे महान्

राजन् हृष्यामि च पुनः पुनः ॥७७॥
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनु
र्धरः ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नी
तिर्मतिर्मम ॥ ७८ ॥ इति श्रीमद्भगव
द्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशा
स्त्रे श्रीकृष्णार्जुनसंवादे संन्यासयोगो
नामाष्टादशोऽध्यायः ॥ १८ ॥

॥ अथ पुष्पदन्तस्य प्रारभ्यते ॥

श्रीगणेशाय नमः ॥ श्रीगोपालकृष्णा
य नमः ॥ यस्य स्मरणमात्रेण जन्मसं
सारबंधनात् ॥ विमुच्यते नमस्तस्मै वि
ष्णवे प्रभविष्णवे ॥ १ ॥ वैशंपायन उ
वाच ॥ श्रुत्वा धर्मानशेषेण पावनानि
च सर्वशः ॥ युधिष्ठिरः शांतनवं पुनरे
वाभ्यभाषत ॥ २ ॥ युधिष्ठिर उवाच ॥

वि. १ किमेकं दैवतं लोके किंवाप्येकं पराय स.
णम् ॥ स्तुवंतः कं कमर्चंतः प्राप्नुयुर्मान
वाः शुभम् ॥ ३ ॥ को धर्मः सर्वधर्मा
णां भवतः परमो मतः ॥ किं जपन् मु
च्यते जंतुर्जन्मसंसारबंधनात् ॥ ४ ॥
भीष्म उवाच ॥ जगत्प्रभुं देवदेवमनं १
तं पुरुषोत्तमम् ॥ स्तुवन्नामसहस्रेण पु

रुषः सततोत्थितः ॥ ५ ॥ तमेव चार्च
यन्नित्यं भक्त्या पुरुषमव्ययम् ॥ ध्या
यन् स्तुवन्नमस्यंश्च यजमानस्तमेव च
॥ ६ ॥ अनादिनिधनं विष्णुं सर्वलोकम
हेश्वरम् ॥ लोकाध्यक्षं स्तुवन्नित्यं सर्व
दुःखातिगो भवेत् ॥ ७ ॥ ब्रह्मण्यं
सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ॥

लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ ८ ॥ एष मे सर्वधर्माणां धर्मोऽधिक
तमो मतः ॥ यद्भक्त्या पुंडरीकाक्षं स्त
वैरर्चेन्नरः सदा ॥ ९ ॥ परमं यो महत्ते
जः परमं यो महत्तपः ॥ परमं यो मह
द्ब्रह्म परमं यः परायणम् ॥ १० ॥ प
वित्राणां पवित्रं यो मंगलानां च मंगल

म् ॥ दैवतं देवतानां च भूतानां यो
ऽव्ययः पिता ॥ ११ ॥ यतः सर्वाणि
भूतानि भवंत्यादियुगागमे ॥ यस्मिं
श्च प्रलयं यांति पुनरेव युगक्षये॥१२॥
तस्य लोकप्रधानस्य जगन्नाथस्य भूप
ते ॥ विष्णोर्नामसहस्रं मे शृणु पापभ
यापहम् ॥ १३ ॥ यानि नामानि गौ

णानि विख्यातानि महात्मनः ॥ ऋ
षिभिः परिगीतानि तानि वक्ष्यामि भू
तये ॥ १४ ॥ अस्य श्रीविष्णोर्दिव्यस
हस्रनामस्तोत्रमंत्रस्य ॥ भगवान् वेद
व्यास ऋषिः॥ श्रीविष्णुः परमात्मा देव
ता ॥ अनुष्टुप् छंदः ॥ अमृतांशूद्भवो
भानुरिति बीजम् ॥ देवकीनंदनः स्र

ष्टेति शक्तिः॥ त्रिसामा सामगः सामे
ति हृदयम् ॥ शंखभृन्नंदकी चक्रीति
कीलकम्॥शार्ङ्गधन्वागदाधर इत्यस्त्रम्
॥ रथांगपाणिरक्षोभ्य इति कवचम् ॥
उद्भवः क्षोभणो देव इति परमो मंत्रः॥
श्रीमहाविष्णुप्रीत्यर्थे जपे विनियोगः॥
अथ न्यासः॥ विश्वंविष्णुर्वषट्कार इत्यं

गुष्ठाभ्यां नमः ॥ अमृतांशूद्भवो भानु
रिति तर्जनीभ्यां नमः॥ब्रह्मण्यो ब्रह्मकृ
त् ब्रह्मेति मध्यमाभ्यां नमः ॥ सुवर्ण
बिंदुरक्षोभ्य इत्यनामिकाभ्यां नमः ॥
निमिषोऽनिमिषः स्रग्वीति कनिष्ठि
काभ्यां नमः ॥ रथांगपाणिरक्षोभ्य इ
ति करतलकरपृष्ठाभ्यां नमः ॥ एवं हृ

दयादिन्यासः ॥ अथ ध्यानम् ॥ शांता
कारं भुजगशयनं पद्मनाभं सुरेशं वि
श्वाधारं गगनसदृशं मेघवर्णं शुभांगम् ॥
लक्ष्मीकांतं कमलनयनं योगिभिर्ध्या
नगम्यं वंदे विष्णुं भवभयहरं सर्वलोकै
कनाथम् ॥ १ ॥ ॐनमो भगवते वासु
देवाय ॥ विश्वं विष्णुर्वषट्कारो भूतभ

वि. व्यभवत्प्रभुः ॥ भूतकृद्भूतभृद्भावो भू स.
५ तात्मा भूतभावनः ॥ १ ॥ पूतात्मा प
रमात्मा च मुक्तानां परमा गतिः ॥ अ
व्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव
च ॥ २ ॥ योगो योगविदां नेता प्रधान
पुरुषेश्वरः ॥ नारसिंहवपुः श्रीमान्के ५
शवः पुरुषोत्तमः ॥ ३ ॥ सर्वः शर्वः शि

वः स्थाणुर्भूतादिर्निधिरव्ययः ॥ संभ
वो भावनो भर्ता प्रभवः प्रभुरीश्वरः
॥ ४ ॥ स्वयंभूः शंभुरादित्यः पुष्करा
क्षो महास्वनः॥ अनादिनिधनो धाता
विधाता धातुरुत्तमः ॥ ५ ॥ अप्रमेयो
हृषीकेशः पद्मनाभोऽमरप्रभुः ॥ विश्व
कर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रु

वः ॥ ६ ॥ अग्राह्यः शाश्वतः कृष्णो लो
हिताक्षः प्रतर्दनः ॥ प्रभूतस्त्रिककुब्धा
म पवित्रं मंगलं परम् ॥ ७ ॥ ईशानः
प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः॥
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः
॥ ८ ॥ ईश्वरो विक्रमी धन्वी मेधावी वि
क्रमः क्रमः ॥ अनुत्तमो दुराधर्षः कृत

ज्ञः कृतिरात्मवान् ॥ ९ ॥ सुरेशः शर
णं शर्म विश्वरेताः प्रजाभवः ॥ अहः
संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः
॥ १० ॥ अजः सर्वेश्वरः सिद्धः सिद्धिः
सर्वादिरच्युतः ॥ वृषाकपिरमेयात्मा
सर्वयोगविनिःसृतः ॥ ११ ॥ वसुर्वसुम
नाःसत्यः समात्मा संमितः समः ॥ अ

मोघः पुंडरीकाक्षो वृषकर्मा वृषाकृतिः ॥ १२ ॥ रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ॥ अमृतः शाश्वतः स्थाणु र्वरारोहो महातपाः ॥ १३ ॥ सर्वगः स र्वविद्भानुर्विष्वक्सेनो जनार्दनः ॥ वेदो वेदविदव्यंगो वेदांगो वेदवित् कविः ॥ १४ ॥ लोकाध्यक्षः सुराध्यक्षो धर्मा

ध्यक्षः कृताकृतः ॥ चतुरात्मा चतुर्व्यू
हश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५ ॥ भ्राजिष्णु
र्भोजनं भोक्ता सहिष्णुर्जगदादिजः ॥
अनघो विजयो जेता विश्वयोनिः पुन
र्वसुः ॥ १६ ॥ उपेंद्रो वामनः प्रांशुर
मोघः शुचिरूर्जितः ॥ अतींद्रः संग्र
हः सर्गो धृतात्मा नियमो यमः ॥ १७ ॥

वि. ८ वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ॥ अतींद्रियो महामायो महोत्साहो महाबलः ॥ १८ ॥ महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ॥ अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ १९ ॥ महेष्वासो महीभर्ता श्रीनिवासः सतांगतिः ॥ अनिरुद्धः सुरा स. ८

नंदो गोविंदो गोविदां पतिः ॥ २० ॥ म
रीचिर्दमनो हंसः सुपर्णो भुजगोत्त
मः ॥ हिरण्यनाभः सुतपाः पद्मनाभः
प्रजापतिः ॥ २१ ॥ अमृत्युः सर्वदृक्
सिंहः संधाता संधिमान् स्थिरः॥ अजो
दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा
॥ २२ ॥ गुरुर्गुरुतमो धाम सत्यः सत्य

पराक्रमः ॥ निमिषोऽनिमिषः स्रग्वी
वाचस्पतिरुदारधीः ॥ २३ ॥ अग्रणी
र्ग्रामणीः श्रीमान् न्यायो नेता समीर
णः ॥ सहस्रमूर्धा विश्वात्मा सहस्रा
क्षः सहस्रपात् ॥ २४ ॥ आवर्तनो नि
वृत्तात्मा संवृतः संप्रमर्दनः ॥ अहः सं
वर्तको वन्हिरनिलो धरणीधरः ॥ २५ ॥

प्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ॥
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ २३ ॥ असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ॥
सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥ २४ ॥ वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ॥

वि. १०

नश्च विविक्तः श्रुतिसागरः ॥ २८ ॥ सभुजो दुर्धरो वाग्मी महेंद्रो वसुदो वसुः ॥ नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९ ॥ ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः ॥ ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भास्करद्युतिः ॥ ३० ॥ अमृतांशूद्भवो भानुः श

स. १०

शबिंदुः सुरेश्वरः ॥ औषधं जगतः सेतुः
सत्यधर्मपराक्रमः ॥ ३१ ॥ भूतभव्य
भवन्नाथः पवनः पावनोऽनलः ॥ का
महा कामकृत् कांतः कामः कामप्रदः प्र
भुः ॥ ३२ ॥ युगादिकृद्युगावर्तो नैक
मायो महाशनः ॥ अदृश्योऽव्यक्तरूप
श्च सहस्रजिदनंतजित् ॥ ३३ ॥ इष्टो

विशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः ॥ क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ३४ ॥ अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ॥ अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ३५ ॥ स्कंदः स्कंदधरो धुर्यो वरदो वायुवाहनः ॥ वासुदेवो बृहद्भानुरादिदेवः पुरं

दरः ॥ ३६ ॥ अशोकस्तारणस्तारः शू
रः शौरिर्जनेश्वरः ॥ अनुकूलः शताव
र्तः पद्मी पद्मनिभेक्षणः ॥ ३७ ॥ पद्म
नाभोऽरविंदाक्षः पद्मगर्भः शरीरभृ
त् ॥ महर्धि ऋद्धो वृद्धात्मा महाक्षो
गरुडध्वजः ॥३८॥ अतुलः शरभो भी
मः समयज्ञो हविर्हरिः ॥ सर्वलक्षणल

वि. क्षण्यो लक्ष्मीवान् समितिंजयः ॥३९॥ स.
१२ विक्षरो रोहितो मार्गो हेतुर्दामोदरः स
हः ॥ महीधरो महाभागो वेगवानमि
ताशनः ॥ ४० ॥ उद्भवः क्षोभणो देवः
श्रीगर्भः परमेश्वरः ॥ करणं कारणं क
र्ता विकर्ता गहनो गुहः ॥ ४१ ॥ व्य १२
वसायो व्यवस्थानः संस्थानः स्थानदो

ध्रुवः ॥ परर्धिः परमः स्पष्टस्तुष्टः पुष्टः
शुभेक्षणः ॥४२॥ रामो विरामो विरजो
मार्गो नेयो नयोऽनयः ॥ वीरः शक्ति
मतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥४३॥
वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृ
थुः ॥ हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायु
रधोक्षजः ॥ ४४ ॥ ऋतुः सुदर्शनः का

लः परमेष्ठी परिग्रहः ॥ उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ४५ ॥ विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम् ॥ अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ४६ ॥ अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो महामखः ॥ नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीह

नः ॥ ४७ ॥ यज्ञ ईज्यो महेज्यश्च क्र
तुः सत्रं सतां गतिः ॥ सर्वदर्शी विमुक्ता
त्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ४८ ॥ सु
व्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः
सुहृत् ॥ मनोहरो जितक्रोधो वीरबाहु
र्विदारणः ॥ ४९ ॥ स्वापनः स्ववशो
व्यापी नैकात्मा नैककर्मकृत् ॥ वत्स

रो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ५० ॥ धर्मगुब्धर्मकृद्धर्मी सदसत्क्षर मक्षरम् ॥ अविज्ञाता सहस्रांशुर्विधा ता कृतलक्षणः ॥ ५१ ॥ गभस्तिनेमिः सत्वस्थः सिंहो भूतमहेश्वरः ॥ आदिदे वो महादेवो देवेशो देवभृद्गुरुः ॥ ५२ ॥ उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरात

नः ॥ शरीरभूतभृद्भोक्ता कपींद्रो भू
रिदक्षिणः ॥ ५३ ॥ सोमपोऽमृतपः
सोमः पुरुजित्पुरुसत्तमः ॥ विनयो ज
यः सत्यसंधो दाशार्हः सात्वतां पतिः
॥ ५४ ॥ जीवो विनयिता साक्षी मुकुं
दोऽमितविक्रमः ॥ अंभोनिधिरनंता
त्मा महोदधिशयोंऽतकः ॥ ५५ ॥ अ

जो महार्हः स्वाभाव्यो जितामित्रः प्र
मोदनः ॥ आनंदो नंदनो नंदः सत्यध
र्मा त्रिविक्रमः ॥ ५६ ॥ महर्षिः कपि
लाचार्यः कृतज्ञो मेदिनीपतिः ॥ त्रिपद
स्त्रिदशाध्यक्षो महाशृंगः कृतांतकृत्
॥ ५७ ॥ महावराहो गोविंदः सुषेणः
कनकांगदी ॥ गुह्यो गभीरो गहनो गुप्त

श्वक्रगदाधरः ॥५८॥ वेधाः स्वांगोऽजि
तः कृष्णो दृढः संकर्षणोऽच्युतः ॥ वरु
णो वारुणो वृक्षः पुष्कराक्षो महाम
नाः ॥५९॥ भगवान् भगहा नंदी व
नमाली हलायुधः ॥ आदित्यो ज्यो
तिरादित्यः सहिष्णुर्गतिसत्तमः ॥६०॥
सुधन्वा खंडपरशुर्दारुणो द्रविणप्रदः ॥

दिवस्पृक् सर्वदृग्व्यासो वाचस्पतिरयो
निजः ॥ ६१ ॥ त्रिसामा सामगः सा
म निर्वाणं भेषजं भिषक् ॥ संन्यासकृ
च्छमः शांतो निष्ठा शांतिः परायणः
॥ ६२ ॥ शुभांगः शांतिदः स्रष्टा कुमुदः
कुवलेशयः ॥ गोहितो गोपतिर्गोप्ता वृष
भाक्षो वृषप्रियः ॥ ६३ ॥ अनिवर्ती नि

वृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ॥ श्रीव
त्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां व
रः ॥६४॥ श्रीदः श्रीशः श्रीनिवासः श्री
निधिः श्रीविभावनः ॥ श्रीधरः श्रीकरः
श्रेयःश्रीमाँल्लोकत्रयाश्रयः॥६५॥स्वक्षः
स्वंगः शतानंदो नंदिर्ज्योतिर्गणेश्वरः ॥
विजितात्मा विधेयात्मा सत्कीर्तिश्छि

न्नसंशयः ॥ ६६ ॥ उदीर्णः सर्वतश्चक्षु
रनीशः शाश्वतः स्थिरः ॥ भूशयो भूष
णो भूतिर्विशोकः शोकनाशनः ॥६७॥
अर्चिष्मानर्चितः कुंभो विशुद्धात्मा
विशोधनः ॥ अनिरुद्धोऽप्रतिरथः प्रद्यु
म्नोऽमितविक्रमः ॥ ६८ ॥ कालनेमि
निहा वीरः शौरिः शूरजनेश्वरः ॥ त्रि

लोकात्मा त्रिलोकेशः केशवः केशिहा
हरिः ॥६९॥ कामदेवः कामपालः का
मी कांतः कृतागमः ॥ अनिर्देश्यवपु
र्विष्णुर्वीरोऽनंतो धनंजयः ॥ ७० ॥
ब्रह्मण्यो ब्रह्मकृत् ब्रह्मा ब्रह्म ब्रह्मविव
र्धनः ॥ ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो
ब्राह्मणप्रियः ॥ ७१ ॥ महाक्रमो महा

कर्मा महातेजा महोरगः ॥ महाक्रतु
र्महायज्वा महायज्ञो महाहविः॥७२॥
स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता
रणप्रियः ॥ पूर्णः पूरयिता पुण्यः पुण्य
कीर्तिरनामयः ॥ ७३ ॥ मनोजवस्ती
र्थकरो वसुरेता वसुप्रदः ॥ वसुप्रदो वासु
देवो वसुर्वसुमना हविः ॥ ७४ ॥ सद्ग

तिः सत्कृतिः सत्ता सद्भूतिः सत्पराय
णः ॥ शूरसेनो यदुश्रेष्ठः सन्निवासः सु
यामुनः ॥ ७५ ॥ भूतावासो वासुदेवः
सर्वासुनिलयो नलः ॥ दर्पहा दर्पदो दृ
प्तो दुर्धरोऽथापराजितः ॥ ७६ ॥ विश्व
मूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ॥ अ
नेकमूर्तिरव्यक्तः शतमूर्तिः शताननः

॥ ७७ ॥ एकोऽनेकः सवः कः किं य
त्तत्पदमनुत्तमम् ॥ लोकबंधुर्लोकना
थो माधवो भक्तवत्सलः ॥ ७८ ॥ सुव
र्णवर्णो हेमांगो वरांगश्चंदनांगदी ॥ वी
रहा विषमः शून्यो धृताशीरचलश्चलः
॥ ७९ ॥ अमानी मानदो मान्यो लोक
स्वामी त्रिलोकधृक् ॥ सुमेधा मेधजो

धन्यः सत्यमेधा धराधरः ॥८०॥ तेजो
वृषो द्युतिधरः सर्वशस्त्रभृतां वरः ॥ प्रग्र
हो निग्रहो व्यग्रो नैकशृंगो गदाग्रजः
॥ ८१ ॥ चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्च
तुर्गतिः ॥ चतुरात्मा चतुर्भावश्चतुर्वेद
विदेकपात् ॥ ८२ ॥ समावर्तो निवृत्ता
त्मा दुर्जयो दुरतिक्रमः ॥ दुर्लभो दुर्ग

मो दुर्गो दुरावासो दुरारिहा ॥८३॥ शु
भांगो लोकसारंगः सुतंतुस्तंतुवर्धनः ॥
इंद्रकर्मा महाकर्मा कृतकर्मा कृतागमः
॥८४॥ उद्भवः सुंदरः सुंदो रत्ननाभः सु
लोचनः ॥ अर्को वाजसनः शृंगी जयं
तः सर्वविज्जयी ॥ ८५ ॥ सुवर्णबिंदुर
क्षोभ्यः सर्ववागीश्वरेश्वरः ॥ महाह्रदो

महागर्तो महाभूतो महानिधिः ॥८६॥
कुमुदः कुंदरः कुंदः पर्जन्यः पावनो
निलः॥अमृतांशोऽमृतवपुःसर्वज्ञः सर्व
तोमुखः ॥८७॥ सुलभः सुव्रतः सिद्धः
शत्रुजिच्छत्रुतापनः ॥ न्यग्रोधोदुंबरो
ऽश्वत्थश्चाणूरांध्रनिषूदनः ॥ ८८॥ सह
स्रार्चिःसप्तजिह्वः सप्तैधाः सप्तवाहनः॥

अमूर्तिरनघोऽचिंत्यो भयकृद्भयनाशनः ॥८९॥ अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ॥ अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥ ९० ॥ भारभृत् कथितो योगी योगीशः सर्वकामदः ॥ आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ ९१ ॥ धनुर्धरो धनुर्वेदो

दंडो दमयिता दमः ॥ अपराजितः स
र्वसहो नियंता नियमो यमः ॥९२॥ स
त्ववान् सात्विकः सत्यः सत्यधर्मपरा
यणः ॥ अभिप्रायः प्रियार्होऽर्हः प्रियकृ
त् प्रीतिवर्धनः ॥ ९३ ॥ विहायसगति
र्ज्योतिः सुरुचिर्हुतभुग्विभुः ॥ रविर्विरो
चनः सूर्यः सविता रविलोचनः ॥९४॥

अनंतो हुतभुग्भोक्ता सुखदो नैकदो ऽग्रजः ॥ अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ ९५ ॥ सनात्सनातनतमः कपिलः कपिरव्ययः ॥ स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः ॥ ९६ ॥ अरौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः ॥ शब्दातिगः श

ब्दसहः शिशिरः शर्वरीकरः ॥ ९७ ॥
अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां
वरः ॥ विद्वत्तमो वीतभयः पुण्यश्रवण
कीर्तनः ॥ ९८ ॥ उत्तारणो दुष्कृतिहा
पुण्यो दुःस्वप्ननाशनः ॥ वीरहा रक्षणः
संतो जीवनः पर्यवस्थितः ॥ ९९ ॥ अ
नंतरूपोऽनंतश्रीर्जितमन्युर्भयापहः ॥

चतुरस्रोगभीरात्मा विदिशो व्यादिशो दिशः ॥१००॥ अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिरांगदः ॥ जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥१॥ आधारनिलयो धातापुष्पहासः प्रजागरः॥ ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः॥२॥प्रमाणंप्राणनिलयः प्राणभृत्

प्राणजीवनः ॥ तत्त्वंतत्त्वविदेकात्माज
न्ममृत्युजरातिगः ॥३॥ भूर्भुवःस्वस्तरु
स्तारःसपिताप्रपितामहः ॥ यज्ञो यज्ञप
तिर्यज्वा यज्ञांगो यज्ञवाहनः ॥ ४ ॥ य
ज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ॥
यज्ञांतकृद्यज्ञगुह्यमन्नमन्नाद एव च
॥ ५ ॥ आत्मयोनिः स्वयंजातो वैखा

नः सामगायनः ॥ देवकीनंदनः स्रष्टा
क्षितीशः पापनाशनः ॥ ६ ॥ शंखभृन्नं
दकी चक्री शार्ङ्गधन्वा गदाधरः ॥ र
थांगपाणिरक्षोभ्यः सर्वप्रहरणायुधः
॥ १०७ ॥ सर्वप्रहरणायुधोन्नम इति ॥
इतीदं कीर्तनीयस्य केशवस्य महात्म
नः ॥ नाम्नां सहस्रं दिव्यानामशेषेण प्र

कीर्तितम् ॥ १ ॥ य इदं शृणुयान्नित्यं
यश्चापि परिकीर्तयेत् ॥ नाशुभं प्राप्नुया
त् किंचित्सोऽमुत्रेह च मानवः ॥२॥
वेदांतगो ब्राह्मणः स्यात्क्षत्रियो विज
यी भवेत् ॥ वैश्यो धनसमृद्धः स्याच्छू
द्रः सुखमवाप्नुयात् ॥३॥ धर्मार्थी प्राप्नु
याद्धर्ममर्थार्थी चार्थमाप्नुयात् ॥ कामा

नवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजा
म् ॥ ४ ॥ भक्तिमान्यः सदोत्थाय शु
चिस्तद्गतमानसः ॥ सहस्रं वासुदेवस्य
नाम्नामेतत्प्रकीर्तयेत् ॥ ५ ॥ यशः प्राप्नो
ति विपुलं ज्ञातिप्राधान्यमेव च ॥ अ
चलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्त
मम् ॥ ६ ॥ न भयं क्वचिदाप्नोति वीर्यं ते

जश्च विंदति ॥ भवत्यरोगो द्युतिमान्ब
लरूपगुणान्वितः ॥ ७ ॥ रोगार्तो मु
च्यते रोगाद्बद्धो मुच्येत बंधनात् ॥
भयान्मुच्येत भीतस्तु मुच्येतापन्न आ
पदः ॥ ८ ॥ दुर्गाण्यतितरत्याशु पुरुषः
पुरुषोत्तमम् ॥ स्तुवन्नामसहस्रेण नि
त्यं भक्तिसमन्वितः ॥ ९ ॥ वासुदेवा

श्रयो मर्त्यो वासुदेवपरायणः ॥ सर्व
पापविशुद्धात्मा याति ब्रह्मसनातनम्
॥ १० ॥ न वासुदेवभक्तानामशुभं विद्य
ते क्वचित् ॥ जन्ममृत्युजराव्याधिभयं
नैवोपजायते ॥ ११ ॥ इमं स्तवमधीया
नः श्रद्धाभक्तिसमन्वितः ॥ युज्येतात्मा
मुखक्षांतिश्रीधृतिस्मृतिकीर्तिभिः १२

न क्रोधो न च मात्सर्यं न लोभो नाशु
भा मतिः ॥ भवंति कृतपुण्यानां भक्ता
नां पुरुषोत्तमे ॥ १३ ॥ द्यौः सचंद्रार्क
नक्षत्रा खं दिशो भूर्महोदधिः ॥ वासु
देवस्य वीर्येण विधृतानि महात्मनः
॥ १४ ॥ ससुरासुरगंधर्वं सयक्षोरगरा
क्षसम् ॥ जगद्वशे वर्ततेदं कृष्णस्य सच

राचरम् ॥ १५ ॥ इंद्रियाणि मनो बुद्धिः
सत्त्वं तेजो बलं धृतिः ॥ वासुदेवात्म
कान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥ १६ ॥
सर्वागमानामाचारः प्रथमं परिकल्पते ॥
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्यु
तः ॥ १७ ॥ ऋषयः पितरो देवा महा
भूतानि धातवः ॥ जंगमाजंगमं चेदं

जगन्नारायणोद्भवम् ॥ १८॥ योगो ज्ञा
नं तथा सांख्यं विद्याः शिल्पादि कर्म
च ॥ वेदाः शास्त्राणि विज्ञानमेतत्सर्वं
जनार्दनात् ॥ १९॥ एको विष्णुर्महद्भू
तं पृथग्भूतान्यनेकशः ॥ त्रीन् लोका
न् व्याप्य भूतात्मा भुंक्ते विश्वभुगव्य
यः॥ २०॥ इमं स्तवं भगवतो विष्णो

व्यासेन कीर्तितम् ॥ पठेद्य इच्छेत्पुरु
षः श्रेयः प्राप्तुं सुखानि च ॥२१॥ वि
श्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ॥
भजंति ये पुष्कराक्षं न ते यांति पराभ
वम् ॥ २२ ॥ अर्जुन उवाच ॥ पद्मपत्र
विशालाक्ष पद्मनाभ सुरोत्तम ॥ भक्ता
नामनुरक्तानां त्राता भव जनार्दन

॥२३॥ श्रीभगवानुवाच ॥ यो मां नाम सहस्रेण स्तोतुमिच्छति पांडव ॥ सोऽह मेकेन श्लोकेन स्तुत एव न संशयः ॥२४॥ नमोऽस्त्वनंताय सहस्रमूर्तये स हस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारि णे नमः ॥२५॥ नमः कमलनाभाय न

मस्ते जलशायिने ॥ नमस्ते केशवानं
त वासुदेव नमोऽस्तु ते ॥२६॥ वासना
द्वासुदेवस्य वासितं भुवनत्रयम् ॥ सर्वभू
तनिवासोऽसि वासुदेव नमोऽस्तु ते
॥२७॥ नमो ब्रह्मण्यदेवाय गोब्राह्मण
हिताय च ॥ जगद्धिताय कृष्णाय गोवि
दाय नमो नमः ॥२८॥ आकाशात्पति

तं तोयं यथा गच्छति सागरम्॥ सर्वदेव
नमस्कारः केशवं प्रतिगच्छति ॥२९॥
एष निष्कंटकः पंथा यत्र संपूज्यते ह
रिः॥ कुपथं तंविजानीयाद्गोविंदरहिता
गमम् ॥३०॥ सर्ववेदेषु यत्पुण्यं सर्वतीर्थे
षुयत्फलम्॥ तत्फलं समवाप्नोति स्तुत्वा
देवं जनार्दनम् ॥३१॥ यो नरः पठते नि

त्यं त्रिकालं केशवालये ॥ द्विकालमेक
कालं वा क्रूरं सर्वं व्यपोहति ॥३२॥ दह्यं
ते रिपवस्तस्य सौम्याः सर्वे सदा ग्रहाः॥
विलीयंते च पापानि स्तवे ह्यस्मिन् प्रकी
र्तिते॥३३॥ येन ध्यातः श्रुतो येन येना
यं पठ्यते स्तवः॥ दत्तानि सर्वदानानि
सुराः सर्वे समर्चिताः ॥३४॥ इह लोके

परे वापि न भयं विद्यते क्वचित्॥ नाम्नां सहस्रं योऽधीते द्वादश्यां मम सन्निधौ ॥३५॥ शनैर्दहति पापानि कल्पकोटि शतानि च॥ अश्वत्थसन्निधौ पार्थ तुल सीसन्निधौ तथा ॥३६॥ पठेन्नामसहस्रं तु गवां कोटि फलं लभेत्॥ शिवालये प ठेन्नित्यं तुलसीवनसंस्थितः ॥३७॥ न

रो मुक्तिमवाप्नोति चक्रपाणेर्वचो यथा॥
ब्रह्महत्यादिकं घोरं सर्वपापं विनश्यति
॥३८॥ इति श्रीमन्महाभारते शतसाह
स्र्यां संहितायां वैयासिक्यामानुशास
निके पर्वणि दानधर्मे भीष्मयुधिष्ठिरसं
वादे श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रं
संपूर्णम्॥ श्रीकृष्णार्पणमस्तु ॥ ॥

॥ अथ भीष्मस्तवराजःप्रारभ्यते ॥



श्रीगणेशाय नमः ॥ श्रीगोपालकृष्णाय नमः ॥ जनमेजय उवाच ॥ शरतल्पे शयानस्तु भारतानां पितामहः ॥ कथ मुत्सृष्टवान् देहं कं च योगमधारयत् ॥ १ ॥ वैशंपायन उवाच ॥ शृणुष्वाव हितो राजन् शुचिर्भूत्वा समाहितः ॥ भीष्मस्य कुरुशार्दूल देहोत्सर्गं महात्म

नः ॥ २ ॥ निवृत्तमात्रे त्वयन उत्तरे वै दिवाकरे ॥ समावेशयदात्मानमात्मन्येवसमाहितः ॥ ३ ॥ शुक्लपक्षस्य चाष्टम्यां माघमासस्य पार्थिव॥ प्राजापत्ये च नक्षत्रे मध्यं प्राप्ते दिवाकरे॥४॥ विकर्णांशुरिवादित्यो भीष्मः शरशतैश्चितः ॥ शुशुभे परया लक्ष्म्या वृतो

ब्राह्मणसत्तमैः ॥ ५ ॥ व्यासेन वेदवि
दुषा नारदेन सुरर्षिणा ॥ देवरातेन वा
त्स्येन तथा तेन सुमंतुना ॥ ६ ॥ तथा
जैमिनिना चैव पैलेन च महात्मना ॥
शांडिल्यदेवालाभ्यां च मैत्रेयेण च धी
मता ॥ ७ ॥ असितेन वसिष्ठेन कौशि
केन महात्मना ॥ हारीतरोमशाभ्यां

च तथात्रेयेण धीमता ॥ ८ ॥ बृहस्पति स्त.
श्च शुक्रश्च च्यवनश्च महामुनिः ॥ सन
त्कुमारकपिलौ वाल्मीकिस्तुंबुरुः कुरुः
॥ ९ ॥ मौद्गल्यो भार्गवो रामस्तृणबिं
दुर्महामुनिः ॥ पिप्पलादश्च वायुश्च सं
वर्तः पुलहः कचः ॥ १० ॥ कश्यपश्च ३
पुलस्त्यश्च क्रतुर्दक्षः पराशरः॥मरीचिरं

गिराः कण्वो गौतमो गालवो मुनिः ॥ ११ ॥ धौम्यो विभांडो मांडव्यो धौम्रः कृष्णोनुभौतिकः ॥ उलूकः परमो विप्रो मार्कंडेयो महामुनिः ॥१२॥ भास्करः पूरणः कृष्णः सूतः परमधार्मिकः ॥ शैब्येन याज्ञवल्क्येन शंखेन लिखितेन च ॥ १३ ॥ एतैश्चान्यैर्मुनिगणैर्महा

मार्गमहात्म्यम् ॥ श्रद्धादमपरमकारं ॥

वृत्तखंडं इव गुरुं ॥ १४ ॥ मौक्तमत्र पद्मं

षड्याख्य कर्मणा मनसा गिरा ॥ शरत

॥ १५ ॥ सर्वेण दृष्टपूर्वेण तद्वाव मयस्तु

नम् ॥ योगेश्वरं पद्मनाभं विष्णं ॥

जगत्पतिम् ॥ १३ ॥ कृतांजलिः शुचि

भूत्वा वाग्विदां प्रवरः प्रभुः ॥ भीष्मः
परमधर्मात्मा वासुदेवमथास्तुवत् १७
भीष्म उवाच ॥ आरिराधयिषुः कृष्णं
वाचं जिगदिषाम्यहम् ॥ तया व्याससं
मासिन्या प्रीयतां पुरुषोत्तमः ॥ १८ ॥
शुचिं शुचिषदं हंसं तत्पदं परमेष्ठिनम् ॥
मुक्त्वा सर्वात्मनात्मानं तं प्रपद्ये प्रजा

पतिम् ॥ १९ ॥ अनाद्यं तत् परं ब्रह्म न देवा नर्षयो विदुः ॥ एकोऽयं भगवान् देवो धाता नारायणो हरिः ॥२०॥ नारायणाद्दषिगणास्तथा सिद्धमहोरगाः ॥ देवा देवर्षयश्चैव तं विदुः परमव्ययम् ॥ २१ ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ यं न जानंति को ह्येषः

कुतो वा भगवानिति ॥ २२ ॥ यस्मि
न्विश्वानि भूतानि तिष्ठंति च विशंति
च ॥ गुणभूतानि भूतेशे सूत्रे मणिग
णा इव ॥ २३ ॥ यस्मिन्नित्ये तते तंतौ
दृढे स्रगिव तिष्ठति ॥ सदसद्ग्रथितं वि
श्वं विश्वांगे विश्वकर्मणि ॥ २४ ॥ हरिं
सहस्रशिरसं सहस्रचरणेक्षणम् ॥ सहस्र

बाहुमुकुटं सहस्रवदनोज्ज्वलम् ॥२५॥ प्राहुर्नारायणं देवं यं विश्वस्य परायणम् ॥ अणीयसामणीयांसं स्थविष्ठं च स्थवीयसाम् ॥२६॥ गरीयसां गरिष्ठं च श्रेष्ठं च श्रेयसामपि ॥ यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च ॥ २७ ॥ गृणंति सर्वकर्माणं सत्यं सत्येषु सामसु ॥

चतुर्भिश्चतुरात्मानं सत्त्वस्थं सात्वतां
पतिम् ॥ २८ ॥ यं दिव्यैर्देवमर्चंति गु
ह्यैः परमनामभिः ॥ यस्मिन्नित्यं तपस्त
तं यदंगेष्वनुतिष्ठति ॥ २९ ॥ सर्वात्मा
सर्ववित्सर्वः सर्वगः सर्वभावनः ॥ यं
देवं देवकी देवी वसुदेवादजीजनत्
॥ ३० ॥ भूमेश्च ब्राह्मणो गुप्त्यै दीप्तम

ग्निमिवारणिः ॥ यमनन्यो व्यपेताशी
रात्मानं वीतकल्मषम् ॥ ३१ ॥ इष्ट्वा
ऽऽनंत्याय गोविदं पश्यत्यात्मानमा
त्मनि ॥ अतिवाय्विंद्रकर्माणमतिसू
र्याग्नितेजसम् ॥ ३२ ॥ अतिबुद्धींद्रि
यात्मानं तं प्रपद्ये प्रजापतिम् ॥ पुरा
णे पुरुषं प्रोक्तं ब्रह्म प्रोक्तं युगादिषु ३३

क्षये संकर्षणं प्रोक्तं तमुपास्यमुपास्महे ॥
यमेकं बहुधात्मानं प्रादुर्भूतमधोक्षज
म् ॥ ३४ ॥ नान्यं भक्ताः क्रियावंतो य
जंते सर्वकामदम् ॥ यं प्राहुर्जगतः को
शं यस्मिन्सन्निहिताः प्रजाः ॥ ३५ ॥
यस्मिन् लोकाः स्फुरंतीमे जले शकुन
यो यथा ॥ ऋतमेकाक्षरं ब्रह्म यत्तत्स

दसतः परम् ॥ ३६ ॥ अनादिमध्यपर्यं
तं न देवा नर्षयो विदुः ॥ यं सुरासुरगंध
र्वाः ससिद्धर्षिमहोरगाः ॥ ३७ ॥ प्रय
ता नित्यमर्चंति परमं दुःखभेषजम् ॥
अनादिनिधनं देवमात्मयोनिं सनात
नम् ॥ ३८ ॥ अवितर्क्यमविज्ञेयं हरिं
नारायणं प्रभुम् ॥ यं वै विश्वस्य कर्तारं

जगतस्तस्थुषां पतिम् ॥३९॥ वदंति ज
गतोऽध्यक्षमक्षरं परमं पदम् ॥ हिरण्य
वर्णो यो गर्भो दितेर्दैत्यनिषूदनः ॥४०॥
एको द्वादशधा जज्ञे तस्मै सूर्यात्मने
नमः ॥ शुक्ले देवान् पितॄन् कृष्णे तर्पय
त्यमृतेन यः ॥ ४१ ॥ यश्च राजा द्विजा
तीनां तस्मै सोमात्मने नमः ॥ महत

स्तमसः पारे पुरुषं ह्यतितेजसम् ॥४२॥ यं ज्ञात्वा मृत्युमत्येति तस्मै ज्ञेयात्मने नमः ॥ ऋग्यजुःसामाथर्वाणं दशार्धं हविरात्मकम् ॥ ४३ ॥ यं बृहंतं बृहत्युक्थं यमिनो यं महाध्वरे ॥ यं विप्रसंघा गायंति तस्मै वेदात्मने नमः॥४४॥ यं सप्ततंतुं तन्वंति तस्मै यज्ञात्मने

नमः ॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च॥ हूयते च पुनर्द्वाभ्यां त स्मै होमात्मने नमः ॥४५॥ यः सुपर्णो यजुर्नाम छंदोगात्रस्त्रिवृच्छिराः॥ रथंत रं बृहत्साम तस्मै स्तोत्रात्मने नमः ॥ ४६ ॥ यः सहस्रसमे सत्रे यज्ञे विश्व सृजामृषिः ॥ हिरण्यपक्षः शकुनिस्त

स्मै तार्क्ष्यात्मने नमः ॥ ४७ ॥ पदांग
संधिपर्वाणं स्वरव्यंजनभूषणम् ॥ यमा
हुश्वाक्षरं नित्यं तस्मै वागात्मने नमः
॥ ४८ ॥ यज्ञांगो यो वराहो वै भूत्वा
गामुज्जहार ह ॥ लोकत्रयहितार्थाय त
स्मै वीर्यात्मने नमः ॥ ४९ ॥ यः शेते
योगमास्थाय पर्यंके नागभूषिते ॥ फ

णासहस्रचिते तस्मै निद्रात्मने नमः ॥ ५० ॥ यश्चिनोति सतां सेतुमृतेना मृतयोनिना ॥ धर्मार्थं व्यवहारार्थं तस्मै सत्यात्मने नमः ॥ ५१ ॥ यं पृ नर्धर्मचरणाः पृथग्धर्मफलैषिणः ॥ पृ थग्धर्मैः समर्चंति तस्मै धर्मात्मने न मः ॥ ५२ ॥ यतः सर्वे प्रसूयंते ह्यनंगा

चैव देहिनः ॥ उन्मादः सर्वभूतानां त स्त.
स्मै कामात्मने नमः ॥ ५३ ॥ यत्तद्व्यक्त
स्थमव्यक्तं विचिन्वंति महर्षयः ॥ क्षेत्रे
क्षेत्रज्ञमासीनं तस्मै क्षेत्रात्मने नमः
॥ ५४ ॥ यं त्रिधात्मानमात्मस्थं वृतं
षोडशभिर्गुणैः ॥ प्राहुःसप्तदशं सांख्या ११
स्तस्मै सांख्यात्मने नमः ॥ ५५ ॥

यं विनिद्रा जितश्वासाः शांता दांता
जितेंद्रियाः ॥ ज्योतिः पश्यंति युंजा
नास्तस्मै योगात्मने नमः ॥५६॥ अ
पुण्यपुण्योपरमे यं पुनर्भवनिर्भयाः ॥
शांताः संन्यासिनो यांति तस्मै मोक्षा
त्मने नमः ॥५७॥ योऽसौ युगसहस्रां
ते प्रदीप्तार्चिर्विभावसुः ॥ संक्षोभयति

भूतानि तस्मै घोरात्मने नमः ॥५८॥ संभक्ष्य सर्वभूतानि कृत्वा चैकार्णवं जगत् ॥ बालः स्वपिति यश्चैकस्तस्मै मायात्मने नमः ॥ ५९ ॥ अजस्य नाभ्यां संभूतं यस्मिन्विश्वं प्रतिष्ठितम् ॥ पुष्करं पुष्कराक्षस्य तस्मै पद्मात्मने नमः ॥ ६० ॥ सहस्रशिरसे चैव पुरु

षायामितात्मने ॥ चतुःसमुद्रपर्यंके यो
गनिद्रात्मने नमः ॥ ६१ ॥ यस्य केशे
षु जीमूता नद्यः सर्वांगसंधिषु ॥ कु
क्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने न
मः ॥ ६२ ॥ यस्मात्सर्वाः प्रसूयंते सर्ग
प्रलयविक्रियाः ॥ यस्मिंश्चैव प्रलीयंते
तस्मै हेत्वात्मने नमः ॥ ६३ ॥ यो नि

षण्णो भवेद्रात्रौ दिवा भवति धिष्ठितः॥ इष्टानिष्टस्य च द्रष्टा तस्मै द्रष्ट्रात्मने नमः ॥ ६४ ॥ अकुंठं सर्वकार्येषु धर्म कार्यार्थमुद्यतम् ॥ वैकुंठस्य हि तद्रूपं तस्मै कार्यात्मने नमः ॥ ६५ ॥ विभज्य पंचधात्मानं वायुभूतः शरीरगः ॥ यश्चेष्टयति भूतानि तस्मै वाय्वात्मने

नमः ॥ ६६ ॥ ब्रह्म वक्त्रं भुजौ क्षत्रं कृ
त्स्नमूरूदरं विशः ॥ पादौ यस्याश्रिताः
शूद्रास्तस्मै वर्णात्मने नमः ॥ ६७ ॥
युगेष्वावर्तमानेषु मासर्त्वयनहायनैः ॥
सर्गप्रलययोः कर्ता तस्मै कालात्मने
नमः ॥ ६८ ॥ यस्याग्निरास्यं द्यौर्मूर्धा
खं नाभिश्चरणौ क्षितिः ॥ सूर्यश्चक्षुर्दि

शः श्रोत्रे तस्मै लोकात्मने नमः ॥६९॥
परः कालात् परो यज्ञात्परात्परतरो
हि यः ॥ अनादिरादिर्विश्वस्य तस्मै वि
श्वात्मने नमः ॥७०॥ विषये वर्तमानो
यस्तं वैशेषिकनिर्गुणैः ॥ प्राहुर्विषयगो
प्तारं तस्मै गोप्त्रात्मने नमः ॥ ७१ ॥
अन्नपानेंधनमयो रसप्राणविवर्धनः ॥

यो धारयति भूतानि तस्मै प्राणात्म
ने नमः ॥ ७२ ॥ पिंगेक्षणसटं यस्य रू
पं दंष्ट्रानखायुधम् ॥ दानवेंद्रांतकरणं
तस्मै दृप्तात्मने नमः ॥७३॥ रसातलग
तः श्रीमाननंतो भगवान्विभुः॥जगद्धा
रयते कृत्स्नं तस्मै वीर्यात्मने नमः ७४
यो मोहयति भूतानि स्नेहपाशानुबंध

नैः ॥ सर्गस्य रक्षणार्थाय तस्मै मोहा
त्मने नमः ॥ ७५ ॥ भूतलातलमध्य
स्थो हत्वा तु मधुकैटभौ ॥ उद्धृता येन
वै वेदास्तस्मै मत्स्यात्मने नमः ॥७६॥
ससागरवनां बिभ्रत्सप्तदीपां वसुंधरा
म् ॥ यो धारति पृष्ठेन तस्मै कूर्मा
त्मने नमः ॥७७॥ एकार्णवे हि म

ग्नां तां वाराहं रूपमास्थितः ॥ उद्धा
र महीं योऽसौ तस्मै क्रोडात्मने नमः
॥ ७८ ॥ नारसिंहं वपुः कृत्वा यस्त्रैलो
क्यभयंकरम् ॥ हिरण्यकशिपुं जघ्ने त
स्मै सिंहात्मने नमः ॥ ७९ ॥ वामनं
रूपमास्थाय बलिं संयम्य मायया ॥
इमे क्रांतास्त्रयो लोकास्तस्मै क्रांतात्म

ने नमः॥८०॥ जमदग्निसुतो भूत्वा रा
मः परशुधृक् विभुः॥ सहस्रार्जुनहंतैव
तस्मै उग्रात्मने नमः॥८१॥ रामो दा
शरथिर्भूत्वा पौलस्त्यकुलनंदनम्॥ ज
घान रावणं संख्ये तस्मै क्षत्रात्मने न
मः॥ ८२॥ वसुदेवसुतः श्रीमान्वासुदे
वो जगत्पतिः॥ जहार वसुधाभारं त

स्मै कृष्णात्मने नमः ॥८३॥ बुद्धरूपं स
मास्थाय सर्वरूपपरायणः ॥ मोहयन्स
र्वभूतानि तस्मै मोहात्मने नमः॥८४॥
हनिष्यति कलेरंते म्लेच्छांस्तुरगवाह
नः ॥ धर्मसंस्थापनार्थाय तस्मै कल्क्या
त्मने नमः ॥ ८५ ॥ आत्मज्ञानमिदं
ज्ञानं ज्ञात्वा पंचस्ववस्थितः ॥ यं ज्ञाने

नाधिगच्छंति तस्मै ज्ञानात्मनेः नमः ॥ ८६ ॥ अप्रमेयशरीराय सर्वतो बुद्धि चक्षुषे ॥ अपारपरिमेयाय तस्मै दिव्या त्मने नमः ॥८७॥ जटिने दंडिने नित्यं लंबोदरशरीरिणे ॥ कमंडलुनिषंगाय त स्मै ब्रह्मात्मने नमः ॥ ८८ ॥ शूलिने त्रिदशेशाय त्र्यंबकाय महात्मने ॥ भ

स्मदिग्धोर्ध्वलिंगाय तस्मै रुद्रात्मने
नमः ॥ ८९ ॥ चंद्रार्धकृतशीर्षाय व्या
लयज्ञोपवीतिने ॥ पिनाकशूलहस्ताय
तस्मा उग्रात्मने नमः ॥ ९० ॥ पं
चभूतात्मभूताय भूतादिनिधनाय च ॥
अक्रोधद्रोहमोहाय तस्मै शांतात्मने
नमः ॥ ९१ ॥ यस्मिन् सर्वे यतः

सर्वे यः सर्वे सर्वतश्च यः ॥ यश्च स
र्वमयो देवस्तस्मै सर्वात्मने नमः ॥
॥ ९२ ॥ विश्वकर्मन्नमस्तेऽस्तु विश्वा
त्मा विश्वसंभवः ॥ अपवर्गस्थभूतानां
पंचानां परतः स्थितः ॥ ९३ ॥ न
मस्ते त्रिषु लोकेषु नमस्ते परतस्त्रिषु ॥
नमस्ते त्रिषु सर्वेषु त्वं हि सर्वमयो

निधिः ॥ ९४ ॥ नमस्ते भगवन्विष्णो
लोकानां प्रभवाप्यय ॥ त्वं हि कर्ता
हृषीकेश संहर्ता च पराजितः ॥ ९५ ॥
तेन पश्यामि भगवन् दिव्येषु त्रिषु
वर्त्मसु ॥ तच्च पश्यामि तत्त्वेन यत्ते
रूपं सनातनम् ॥ ९६ ॥ दिवं ते शि
रसा व्याप्तां पद्भ्यां देवी वसुंधरा ॥

विक्रमेण त्रयो लोकाः पुरुषोऽसि स
नातनः ॥ ९७ ॥ दिशो भुजा रविश्च
क्षुर्वीर्यं शुक्रः प्रजापतिः ॥ सप्त मार्गा
निरुद्धास्ते वायोरमिततेजसः ॥ ९८ ॥
अतसीपुष्पसंकाशं पीतकौशेयवाससं
म् ॥ नमस्यंति च गोविंदं न तेषां वि
द्यते भयम् ॥ ९९ ॥ नमो नरकसंत्रास

रक्षामंडलकारिणे ॥ संसारनिम्नगाव
र्ततरिकाष्ठाय विष्णवे ॥ १०० ॥ नमो
ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ॥
जगद्धिताय कृष्णाय गोविंदाय नमो
नमः ॥१॥ प्राणकांतारपाथेयं संसारच्छे
दभेषजम् ॥ दुःखशोकपरित्राणं हरिरि
त्यक्षरद्वयम् ॥ २॥ यथा विष्णुमयं स

त्यं यथा विष्णुमयं जगत् ॥ यथा वि
ष्णुमयं सर्वं पापं नाशयते तथा ॥ ३ ॥
त्वां प्रपन्नाय भक्ताय गतिमिष्टां जि
गीषवे ॥ यच्छ्रेयः पुंडरीकाक्ष तद्ध्याय
स्व सुरेश्वर ॥ ४ ॥ इति विद्यातपोयोनि
रयोनिर्विष्णुरीडितः ॥ वाग्यज्ञेनार्चितो
देवः प्रीयतां मे जनार्दनः ॥ ५ ॥ ना

रायणपरं ब्रह्म नारायणपरं तपः ॥ ना
रायणपरं चेदं सर्वं नारायणात्मकम्
॥६॥ वैशंपायन उवाच ॥ एतावदुक्त्वा
वचनं भीष्मस्त्वाद्दतमानसः ॥ नम इ
त्येव कृष्णाय प्रणाममकरोत्तदा ॥ ७ ॥
अभिगम्य तु योगेन भक्तिं भीष्मस्य
माधवः ॥ त्रैलोक्यदर्शने ज्ञानं दिव्यं

दत्वा ययौ हरिः ॥ ८ ॥ तस्मिन्नुपरते स्त.
शब्दे ततस्ते ब्रह्मवादिनः ॥ भीष्मं वा
ग्भिर्बाष्पकंठास्तमानर्चुर्महामतिम्।९।
ते स्तुवंतश्च विप्राग्र्याः केशवं पुरुषोत्त
मम् ॥ भीष्मं च शनकैः सर्वे प्रशशंसुः
पुनः पुनः ॥ १० ॥ यं योगिनः प्राणवि २१
योगकाले यत्नेन चित्ते विनिवेशयंति॥

साक्षात्पुरस्ताद्धरिमीक्षमाणः प्राणान्
जहौ प्राप्तकालो हि भीष्मः ॥ ११ ॥
शुक्लपक्षे दिवा भूमौ गंगायां चोत्तराय
णे॥धन्यास्तात मरिष्यंति हृदयस्थे ज
नार्दने॥१२॥विदित्वा भक्तियोगंतु भी
ष्मस्य पुरुषोत्तमः ॥ सहसोत्थाय संतु
ष्टो यानमेवाभ्यपद्यत ॥ १३ ॥ केशवः


सात्यकिश्चैव रथेनैकेन जग्मतुः ॥ अ
परेण महात्मानौ युधिष्ठिरधनंजयौ
॥ १४ ॥ भीमसेनो यमौ चोभौ रथमे
कं समास्थिताः ॥ कृपो युयुत्सुः सूतश्च
संजयश्चापरं रथम् ॥ १५ ॥ ते रथैर्नगरा
कारैः प्रयाताः पुरुषर्षभाः ॥ नेमिघोषे
ण महता कंपयंतो वसुंधराम् ॥ १६ ॥

ततो गिरः पुरुषवरस्तवान्विता द्विजेरि
ताः पथि सुमनाः स शुश्रुवे ॥ कृतांजलिं
प्रणतमथापरं जनं स केशिहा मुदित
मनाभ्यनंदत ॥ १७ ॥ अनादिनिधनं
विष्णुं सर्वलोकमहेश्वरम् ॥ धर्माध्यक्षं
स्तुवन्नित्यं सर्वपापैः प्रमुच्यते॥ १८॥इ
मं स्तवं यः पठति शार्ङ्गधन्वनः शृणो

ति वा भक्तिसमन्वितो जनः ॥ सचक्र
धृक् प्रतिहतसर्वकल्मषो जनार्दनं प्र
विशति देहसंक्षये ॥ १९ ॥ अशनिशि
तसुधारं यस्य चक्रं सुचारु मणिकनक
विचित्रे कुंडले यस्य कर्णे ॥ भ्रमरशत
सहस्रैः सेविता यस्य माला असुरकुल
निहंता प्रीयतां वासुदेवः ॥ २० ॥ स्त

वराजः समाप्तोऽयं विष्णोरद्भुतकर्म
णः ॥ गांगेयेन पुरा गीतो महापातक
नाशनः॥ २१ ॥ श्रीभगवानुवाच ॥ यः
संपठेदिदं स्तोत्रं मम जन्मानुकीर्तन
म् ॥ देवलोकमतिक्रम्य तस्य लोको य
था मम ॥ १२२ ॥ इति श्रीमन्महा
भारते शतसाहस्र्यां संहितायां वैया

सिक्यां शांतिपर्वणि भीष्मयुधिष्ठिरसंवादे भीष्मस्तवराजः समाप्तः ॥ ॥



॥ अथ अनुक्रमणिकायां प्रारभ्यते ॥

श्रीगणेशाय नमः ॥ श्रीगोपालकृष्णाय
नमः ॥ शतानीक उवाच ॥ महामते म
हाप्राज्ञ सर्वशास्त्रविशारद ॥ अक्षीण
कर्मबंधस्तु पुरुषो द्विजसत्तम ॥ १ ॥ स
ततं किं जपेत् जाप्यं विबुधः किमनु
स्मरन् ॥ मरणे यज्जपेज्जाप्यं यं च भा
वमनुस्मरन् ॥ २ ॥ यं च ध्यात्वा द्विज

श्रेष्ठ पुरुषो मृत्युमागतः ॥ परं पदम्
वाप्नोति तन्मे वद महामुने ॥ ३ ॥ ओं
नमः ऊर्ध्वाय ॥ इदमेव महाप्राज्ञ पृच्छा
मः पितामहम् ॥ मौण्डम् धर्मभृतां श्रेष्ठं
धर्मपुत्रो युधिष्ठिरः ॥ ४ ॥ युधिष्ठिर
वाच ॥ पितामह महाप्राज्ञ सर्वशास्त्र
विशारद ॥ प्रयाणकाले किं चित्यं मम

क्षोस्तत्त्वचिंतकैः ॥५॥ किंनु स्मरन् कु
रुश्रेष्ठ मरणे पर्युपस्थिते ॥ प्राप्नुयां पर
मां सिद्धिं श्रोतुमिच्छामि तत्त्वतः॥ ६॥
भीष्म उवाच ॥ तद्युक्तं स्वहितं सूक्ष्मं
प्रश्नमुक्तं त्वयाऽनघ ॥ शृणुष्वावहितो
राजन्नारदेन पुरा श्रुतम् ॥ ७ ॥ श्रीव
त्सांकं जगद्बीजमनंतं लोकसाक्षिणम् ॥

पुरा नारायणं देवं नारदः परिपृष्टवान् ॥ ८ ॥ नारद उवाच ॥ त्वमक्षरं परं ब्रह्म निर्गुणं तमसः परम् ॥ आहुर्वेद्यं परं धाम ब्रह्माणं कमलोद्भवम् ॥ ९ ॥ भगवन् भूतभव्येश श्रद्दधानैर्जितेंद्रियैः ॥ कथं भक्तैर्विचिंत्योऽसि योगिभिर्मोक्षकांक्षिभिः ॥ १० ॥ किं नु जाप्यं जपेन्नि

त्यं कल्प उत्थाय मानवः ॥ कथं जपे
त्सदा ध्यायेद् ब्रूहि तत्त्वं सनातनम्
॥ ११ ॥ भीष्म उवाच ॥ श्रुत्वा च तस्य
देवर्षेर्वाक्यं वाक्यविशारदः ॥ प्रोवाचभ
गवान्विष्णुर्नारदाय च धीमते ॥ १२ ॥
श्रीभगवानुवाच ॥ हंत ते कथयिष्या
मि इमां दिव्यामनुस्मृतिम् ॥ मरणे

मामनुस्मृत्य प्राप्नोति परमां गतिम् ॥ १३ ॥ यामधीत्य प्रयाणे तु मद्भा वायोपपद्यते ॥ ॐकारमग्रतः कृत्वा मां नमस्कृत्य नारद ॥ १४ ॥ एकाग्रः प्रयतो भूत्वा इमं मंत्रमुदीरयेत्॥ ॐ नमो भगवते वासुदेवाय इत्ययम् ॥ १५ ॥ अवशेनापि यन्नाम्नि कीर्तिते सर्वपात

कैः ॥ पुमान् विमुच्यते सद्यः सिंहत्र
स्तैर्मृगैरिव ॥ १६ ॥ क्षराक्षरविसृष्टस्तु
प्रोच्यते पुरुषोत्तमः ॥ अव्यक्तं शाश्व
तं देवं प्रभवं पुरुषोत्तमम् ॥ १७ ॥ प्र
पद्ये पुंडरीकाक्षं देवं नारायणं हरिम् ॥
लोकानाथं सहस्राक्षमक्षरं परमं पदम्
॥ १८ ॥ भगवंतं प्रपन्नोस्मि भूतभव्य

अ. ५ भवत्प्रभुम् ॥ स्रष्टारं सर्वलोकानामनं स्मृ.
तं विश्वतोमुखम् ॥ १९ ॥ पद्मनाभं
हृषीकेशं प्रपद्ये सत्यमच्युतम्॥हिरण्य
गर्भममृतं भूगर्भं तमसः परम्॥२०॥
प्रभोः प्रभुमनाद्यं च प्रपद्ये तं रविप्रभ
म्॥ सहस्रशीर्षकं देवं महर्षे सत्त्वभा ५
वनम् ॥२१॥ प्रपद्ये सूक्ष्ममचलं वरेण्य

मनघं शुचिम् ॥ नारायणं पुराणेशं यो
गावासं सनातनम् ॥ २२ ॥ संयोगं स
र्वभूतानां प्रपद्ये ध्रुवमीश्वरम् ॥ यः पुरा
प्रलये प्राप्ते नष्टे स्थावरजंगमे ॥ २३ ॥
ब्रह्मादिषु प्रलीनेषु नष्टे लोके चराचरे ॥
एकस्तिष्ठति विश्वात्मा स मे विष्णुः प्र
सीदतु ॥ २४ ॥ यः प्रभुः सर्वलोकानां

येन सर्वमिदं ततम् ॥ चराचरगुरुर्देवः स मे विष्णुः प्रसीदतु ॥ २५ ॥ आभूत संप्लवे चैव प्रलीने प्रकृतौ महान् ॥ योऽवतिष्ठति विश्वात्मा स मे विष्णुः प्रसीदतु ॥ २६ ॥ येन क्रांतास्त्रयो लोका दानवाश्च वशीकृताः ॥ शरण्यः सर्वलोकानां स मे विष्णुः प्रसीदतु ॥ २७ ॥ यस्य

हस्ते गदा चक्रं गरुडो यस्य वाहनम् ॥
शंखः करतले यस्य स मे विष्णुः प्रसीद
तु ॥ २८ ॥ कार्यं क्रिया च करणं कर्ता
हेतुः प्रयोजनम् ॥ अक्रियाकरणे कार्ये
स मे विष्णुः प्रसीदतु ॥ २९ ॥ चतुर्भि
श्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च ॥
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसी

दतु॥३०॥शमीगर्भस्य यो गर्भस्तस्य ग
र्भस्य योरिपुः॥रिपुगर्भस्य योगर्भः स मे
विष्णुः प्रसीदतु॥३१॥अग्निसोमार्कता
राणां ब्रह्मरुद्रेंद्रयोगिनाम्॥यस्तेजयाति
तेजांसि स मे विष्णुः प्रसीदतु॥३२॥प
र्जन्यः पृथिवी सस्यंकालो धर्मः क्रिया
फलम्॥गुणाकरः स मे बभ्रुर्वासुदेवः प्र

सीदतु ॥ ३३ ॥ योगावास नमस्तुभ्यं
सर्ववास वरप्रद ॥ हिरण्यगर्भ यज्ञांग
पंचगर्भ नमोऽस्तु ते ॥ ३४ ॥ चतुर्भू
तपरं धाम लक्ष्म्यावास सदाच्युत ॥
शब्दादिवासनान्योऽसि वासुदेव प्रधा
नकृत् ॥ ३५ ॥ अजः संगमनः पार्थो ह्य
मूर्तिर्विश्वमूर्तिधृक् ॥ श्रीः कीर्तिः पंच

कालज्ञो नमस्ते ज्ञानसागर ॥ ३६ ॥ अ
व्यक्ताव्यक्तमुत्पन्नमव्यक्ताद्यः परात्प
रः ॥ यस्मात् परतरं नास्ति तमस्मि
शरणं गतः ॥ ३७ ॥ चिंतयंतो ह्यजं
नित्यं ब्रह्मेशानादयः सुराः ॥ निश्चयंना
धिगच्छंति तमस्मि शरणं गतः ॥ ३८ ॥
जितेंद्रिया जितात्मानो ज्ञानध्यानप

रायणाः ॥ यं प्राप्य न निवर्तंते तम
स्मि शरणं गतः ॥ ३९ ॥ एकांशेन
जगत्कृत्स्नमवष्टभ्य स्थितः प्रभुः ॥ अ
ग्राह्यो निर्गुणो नित्यस्तमस्मि शरणं ग
तः॥ ४० ॥सोमार्काग्निमयं तेजो या च
तारामयी द्युतिः॥ दिवि संजायते तेजः
स महात्मा प्रसीदतु ॥ ४१ ॥ गुणात्मा

अ. निर्गुणश्चान्यो रश्मिवांश्चेतनो ह्यजः ॥ स्मृ.
९ सूक्ष्मः सर्वगतो देहः स महात्मा प्रसी
दतु॥४२॥अव्यक्तं सदधिष्ठानमचिंत्यं
तमसः परम्॥प्रकृतिः प्रकृतिं भुंक्ते स म
हात्मा प्रसीदतु॥४३॥क्षेत्रज्ञः पंचधा भुं
क्ते प्रकृतिं पंचभिर्मुखैः ॥ महागुणांश्च ९
यो भुंक्ते स महात्मा प्रसीदतु ॥४४॥

सांख्ययोगाश्च ये चान्ये सिद्धाश्च पर
मर्षयः ॥ यं विदित्वा विमुच्यंते स म
हात्मा प्रसीदतु ॥ ४५ ॥ अतींद्रिय न
मस्तुभ्यं लिंगैर्व्यक्तैर्न मीयसे ॥ ये च
त्वां नाभिजानंति तमस्मि शरणं गतः
॥ ४६ ॥ कामक्रोधविनिर्मुक्ता रागद्वे
षविवर्जिताः ॥ अन्यभक्ता न जानंति

न पुनर्नारकी जनः ॥ ४७ ॥ एकांति
नो हि निर्द्वंद्वा निराशाः कर्मकारि
णः॥ ज्ञानाग्निदग्धकर्माणस्त्वां विशंति
मनस्विनः ॥ ४८ ॥ अशरीरं शरीरस्थं
समं सर्वेषु देहिषु ॥ पापपुण्यविनिर्मु
क्ता भक्तास्त्वां पर्युपासते ॥ ४९ ॥ अ
व्यक्तबुद्ध्यहंकारमनोभूतेंद्रियाणि च ॥

त्वयि तानि न तेषु त्वं तेषु तानि न
ते त्वयि ॥ ७० ॥ एकत्वाय च नाना
त्वं ये विदुर्यांति ते परम् ॥ ममत्वमिह
कांक्षितं मक्षया वै नान्यचेतसा ॥ ७१ ॥
चराचरमिदं सर्वं मत्तश्चान्यं चतुर्विधम् ॥
त्वयि तंतौ च तत्प्रोतं सूत्रे मणिगणा
इव ॥ ७२ ॥ यथा मोक्षमिहाप्नोषि

त्यः सर्वसंज्ञितः ॥ अकर्ता हेतुरहितः पृथगात्मा व्यवस्थितः ॥ ५३ ॥ न मे भूतेषु संयोगः पुनर्भवतु जन्मनि ॥ अहंकारेण बुद्ध्या वा न मे योगास्त्रिभिर्गुणैः ॥ ५४ ॥ न मे धर्मो ह्यधर्मो वा नारंभो जन्म वा पुनः ॥ जरामरणमोक्षार्थं त्वां प्रपन्नोऽस्मि सर्वगम् ॥ ५५ ॥ वि

षयैरिंद्रियैश्चापि न मे भूयः समाग
मः ॥ ईश्वरोऽसि जगन्नाथ किमतः प
रमुच्यते ॥ ५६ ॥ भक्तानां यद्धितं देव
तत्ते हि त्रिदशेश्वर ॥ पृथिवीं यातु मे
घ्राणं यातु मे रसनं जलम् ॥५७॥ रू
पं हुताशने यातु स्पर्शो मे यातु मारु
ते ॥ श्रोत्रमाकाशमभ्येतु मनो वैकारि

कं पुनः ॥ ५८ ॥ इंद्रियाणि गुणान्यांतु स्वेषु स्वेषु च योनिषु ॥ पृथिवी यातु सलिलमापोऽग्निमनलोऽनिलम् ॥ ५९ ॥ वायुराकाशमभ्येतु मनश्चाकाशमेव च ॥ अहंकारं मनो यातु मोहनं सर्वदेहिनाम् ॥ ६० ॥ अहंकारस्तथा बुद्धिं बुद्धिरव्यक्तमेव च ॥ प्रधानं प्रकृतिं या

तु गुणसाम्ये व्यवस्थिते ॥ ६१ ॥ विस
र्गः सर्वकरणैर्गुणभूतैश्च मे भवेत् ॥ स
त्वं रजस्तमश्चैव प्रकृतिं प्रविशंतु मे
॥ ६२ ॥ नैष्कैवल्यपदं देव कांक्षेऽहं ते
परंतप ॥ एकीभावस्त्वया मेऽस्तु न मे
जन्म भवेत् पुनः ॥ ६३ ॥ नमो भग
वते तस्मै विष्णवे प्रभविष्णवे ॥ त्वद्भु

द्धिस्त्वद्गतप्राणस्त्वद्भक्तस्त्वत्परायणः ॥ ६४ ॥ त्वामेवाहं स्मरिष्यामि मरणे पर्यवस्थिते ॥ पूर्वदेहे कृता ये मे व्याधयः प्रविशंतु माम् ॥ ६५ ॥ अर्दयंतु च मां दुःखान्यृणं मे प्रतिमुच्यताम् ॥ अनुध्येयोऽसि मे देव न मे जन्म भवेत्पुनः ॥ ६६ ॥ अस्माद् ब्रवीमि कर्मा

णि ऋणं मे न भवेदिति ॥ उपतिष्ठंतु
मां सर्वे व्याधयः पूर्ववंचिताः॥६७॥अ
नृणो गंतुमिच्छामि तद्विष्णोः परमं प
दम्॥अहं भगवतस्तस्य मम वासःसना
तनः॥६८॥तस्याहं न प्रणश्यामि स च
मे न प्रणश्यति ॥ कर्मेंद्रियाणि संयम्य
पंचभूतेंद्रियाणि च॥६९॥दशेंद्रियाणि

मनसि अहंकारं तथा मनः ॥ अहंकारं तथाबुद्धौबुद्धिमात्मनियोजयेत् ॥७०
आत्मबुद्धींद्रियं पश्येद्बुद्ध्याबुद्धेः परात्परम्॥एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ॥७१॥ ततो बुद्धेः परं बुद्ध्वा लभते न पुनर्भवम् ॥ ममायमिति तस्याहं येन सर्वमिदं ततम् ॥ ७२ ॥ आ

त्मन्यात्मनि संयोज्य परात्मानमनु
स्मरेत् ॥ नमो भगवते तस्मै देहिनां प
रमात्मने ॥ ७३ ॥ नारायणाय भक्ता
य एकनिष्ठाय शाश्वते ॥ हृदिस्थाय च
भूतानां सर्वेषां च महात्मने ॥ ७४ ॥
इमामनुस्मृतिं दिव्यां वैष्णवीं पापना
शिनीम् ॥ स्वपन्विबुद्धश्च पठेद्यत्र यत्र

समभ्यसेत् ॥ ७५ ॥ मरणे समनुप्राप्ते स्मृ.
यदेकं मामनुस्मरेत् ॥ अपि पापसमा
चारः स याति परमां गतिम् ॥ ७६ ॥
यद्यहंकारमाश्रित्य यज्ञदानतपःक्रि
याः ॥ कुर्वन् फलमवाप्नोति पुनरावर्त
नं च तत् ॥ ७७ ॥ अभ्यर्चयन् पितृ १५
न् देवान् पठन् जुह्वन् बलिं ददन् ॥ ज्व

लदग्नौ स्मरेद्यो मां लभते परमां गति
म् ॥ ७८ ॥ यज्ञो दानं तपश्चैव पावना
नि मनीषिणाम् ॥ यज्ञदानतपस्तस्मा
त्कुर्याद्रागविवर्जितः ॥ ७९ ॥ पौर्णमा
स्याममावास्यां द्वादश्यां च तथैव च ॥
श्रावयेच्छ्रद्दधानश्च मद्भक्तश्च विशेषतः
॥८०॥ नम इत्येव यो ब्रूयान्मद्भक्तः श्र

द्धयान्वितः ॥ तस्याक्षयो भवेल्लोकः श्व
पाकस्यापि नारद ॥ ८१ ॥ किं पुनर्ये भ
जंते मां साधका विधिपूर्वकम् ॥ श्रद्धा
वंतो यतात्मानस्ते यांति परमां गतिम्
॥ ८२ ॥ कर्माण्याद्यंतवंतीह मद्भक्तो
ऽनंतमश्नुते ॥ मामेव तस्माद्देवर्षे ध्या
हि नित्यमतंद्रितः ॥ ८३ ॥ अज्ञानां

चैव यो ज्ञानं दद्याद्धर्मोपदेशतः ॥ कृ
त्स्नां वा पृथिवीं दद्याद्येन तुल्यं न तत्
फलम् ॥ ८४ ॥ तस्मात्प्रदेयं साधुभ्यो
जपं बंधभयापहम् ॥ अवाप्स्यति ततः
सिद्धिं प्राप्स्यते च पदं मम ॥ ८५ ॥ अ
श्वमेधसहस्रैश्च वाजपेयशतैरपि ॥
नासौ परमवाप्नोति मद्भक्तैर्यदवाप्यते

॥ ८६ ॥ भीष्म उवाच ॥ हरेः पृष्टं पुरा तेन नारदेन सुरर्षिणा ॥ यदुवाच ततः शंभुस्तदुक्तं समनुव्रतः ॥ ८७ ॥ त्वमप्येकमना भूत्वा ध्याहि ध्येहं गुणाधिकम् ॥ भजस्व सर्वभावेन परमात्मानमव्ययम् ॥ ८८ ॥ श्रुत्वैवं नारदो वाक्यं दिव्यं नारायणोदितम् ॥ अत्यंतं भक्ति

मान् देव एकांतित्वमुपेयिवान् ॥८९॥
नारायणमृषिं देवं दशवर्षाण्यनन्यभा
क् ॥ इमं जपित्वा चाप्नोति तद्विष्णोः
परमं पदम् ॥ ९० ॥ किं तस्य बहुभि
र्मंत्रैः किं तस्य बहुभिर्व्रतैः ॥ नमो ना
रायणायेति मंत्रः सर्वार्थसाधकः॥९१॥
किं तस्य दानैः किं तीर्थैः किं तपोभिः

किमध्वरैः ॥ यो नित्यं ध्यायते देवं नारायणमनन्यधीः ॥ ९२ ॥ ये नृशंसा दुरात्मानः पापाचाररतास्तथा ॥ तेऽपि यांति परं स्थानं नारायणपरायणाः ॥ ९३ ॥ अनन्यया मंदबुद्ध्या प्रतिभाति दुरात्मनाम् ॥ कुतर्काज्ञानदृष्टीनां विभ्रांतेंद्रियवर्त्मनाम् ॥ ९४ ॥ नमो

नारयणायेति ये विदुर्ब्रह्म शाश्वतम् ॥
अंतकाले जपाद्यांति तद्विष्णोः परमं प
दम् ॥ ९५ ॥ आचारहीनोऽपि मुनिप्र
वीर भक्त्याविहीनोऽपि विनिंदितो
ऽपि ॥ किं तस्य नारायणशब्दमात्रतोवि
मुक्तपापो विशतेऽच्युतां गतिम् ॥ ९६ ॥
कांतारवनदुर्गेषु कृच्छ्रेष्वापत्सु संयुगे ॥


दस्युभिःसन्निरुद्धश्च नामभिर्मो प्रकीर्तयेत् ॥ ९७ ॥ जन्मांतरसहस्रेषु तपो ध्यानसमाधिभिः ॥ नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥ ९८ ॥ नास्नोऽस्ति यावती शक्तिः पापनिर्हरणे हरेः ॥ श्वपचोऽपि नरः कर्तुं क्षमस्तावन्न किल्बिषम् ॥ ९९ ॥ न तावत्पाप

मस्तीह यावन्नामाहृतं हरेः ॥ अतिरेक
भयादाहुःप्रायश्चित्तांतरं वृथा॥१००॥
गत्वा गत्वा निवर्तंते चंद्रसूर्यादयो ग्र
हाः ॥ अद्यापि न निवर्तंते द्वादशाक्षर
चिंतकाः ॥ १०१ ॥ न वासुदेवात्परम
स्ति मंगलं न वासुदेवात्परमस्ति पाव
नम् ॥ न वासुदेवात्परमस्ति दैवतं तं वा

सुदेवं प्रणमन्न सीदति ॥ १०२ ॥ इमां रहस्यां परमामनुस्मृतिं योऽधीत्य बुद्धिं लभते च नैष्ठिकीम् ॥ विहाय पापं विनिमुच्य संकटात् स वीतरागो विचरेन्महीमिमाम् ॥ १०३ ॥ इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यामानशासनिके पर्वणि दा

नधर्मे श्रीविष्णोर्दिव्यमनुस्मृतिस्तोत्रं
संपूर्णम् ॥शुभं भवतु ॥ ॥ ॥






॥ श्रीमद्भगवद्गीता ॥

॥ अथ प्रथमोऽध्यायः ॥

॥ अथ गजेंद्रमोक्षः प्रारभ्यते ॥



श्रीगणेशाय नमः ॥ श्रीगोपालकृष्णाय
नमः ॥ शतानीक उवाच ॥ मया हि
देवदेवस्य विष्णोरमिततेजसः ॥ श्रुताः
संभूतयः सर्वा गदतस्तव सुव्रत॥ १॥य
दि प्रसन्नो भगवाननुग्राह्योऽस्मि वा य
दि ॥ तदहं श्रोतुमिच्छामि नृणां दुःख
प्रनाशनम्॥२॥ स्वप्नादिषु महाभाग द्ट

श्यंते ये शुभाशुभाः ॥ फलानि च प्रय
च्छंति तद्गुणान्येव भार्गव ॥ ३ ॥ तादृ
क् पुण्यं पवित्रं च नृणामतिशुभप्रदम् ॥
दुष्टस्वप्नोपशमनं तन्मे विस्तरतो वद
॥ ४ ॥ शौनक उवाच ॥ इदमेव महा
भाग पृष्टवान्स्वपितामहम् ॥ भीष्मं ध
र्मभृतां श्रेष्ठं धर्मपुत्रो युधिष्ठिरः ॥ ५ ॥

भीष्म उवाच ॥ आद्यं पुरुषमीशानं पु
रुहूतं पुरातनम् ॥ ऋतुमेकाक्षरं ब्रह्म व्य
क्ताव्यक्तं सनातनम् ॥ ६ ॥ असच्च सच्च
यद्विश्वं नित्यं सदसतः परम् ॥ परं परा
णां स्रष्टारं पुराणं परमव्ययम् ॥ ७ ॥ मां
गल्यं मंगलं विष्णुं वरेण्यमनघं शुचि
म् ॥ नमस्कृत्य हृषीकेशं चराचरगुरुं

हरिम् ॥ ८ ॥ प्रवक्ष्यामि महापुण्यं कृष्ण द्वैपायनस्य च ॥ येनोक्तेन श्रुतेनापि न श्यते सर्वपातकम् ॥ ९ ॥ नारायणसमो देवो न भूतो न भविष्यति ॥ एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम् ॥ १० ॥ किं तस्य बहुभिर्मंत्रैः किं तस्य बहुभिर्व्रतैः ॥ नमो नारायणायेति मं

त्रः सर्वार्थसाधकः ॥ ११ ॥ जज्ञे बहु
परमत्युदारं यं द्वीपमध्ये सुतमात्म
तम् ॥ पराशराद्गंधवती महर्षेस्तस्मै न
मोऽज्ञानतमोनुदाय ॥ १२ ॥ नमो भ
गवते तस्मै व्यासायामिततेजसे ॥ यस्य
प्रसादाद्वक्ष्यामि नारायणकथामिमा
म् ॥ १३ ॥ वैशंपायनमासीनं पुराणो

क्तिविचक्षणम् ॥ इममर्थं स राजर्षिः पृ
ष्टवान् जनमेजयः ॥ १४ ॥ जनमेज
य उवाच ॥ किं जपन्मुच्यते पापात्
किं जपन्सुखमश्नुते ॥ दुःस्वप्ननाशनं
पुण्यं श्रोतुमिच्छामि मानद ॥ १५ ॥ वै
शंपायन उवाच ॥ एवमेव पुरा प्रश्नं पृ
ष्टवांस्ते पितामहः ॥ भीष्मं वै व्रतिनां

श्रेष्ठं तं चाहं कथयामि ते ॥ १६ ॥ दे
वव्रतं महाप्राज्ञं सर्वशास्त्रविशारदम् ॥
विनयेनोपसंगम्य पर्यपृच्छद्युधिष्ठिरः
॥ १७ ॥ युधिष्ठिर उवाच ॥ दुःस्वप्नदर्शनं
घोरमवेक्ष्य भरतर्षभ ॥ प्रयतः किं ज
पेज्जाप्यं विबुद्धः किमनुस्मरेत् ॥ १८ ॥
कस्य कुर्यान्नमस्कारं प्रातरुत्थाय मान

वः ॥ किं च ध्यायेत सततं किं पूज्यं वा भवेत्सदा ॥ १९ ॥ पितामहप्रसादे न बुद्धिभेदो भवेन्न मे ॥ तदहं श्रोतुमिच्छामि ब्रूहि नो वदतां वर ॥२०॥ भीष्म उवाच ॥ शृणु राजन्महाबाहो कथयिष्येह शांतिकम् ॥ दुःस्वप्नदर्शने जाप्यं यद्वा नित्यं समाहितैः ॥ २१ ॥

आत्राप्युदाहरंतीममितिहासं पुरातन
म् ॥ गजेंद्रमोक्षणं पुण्यं कृष्णस्याद्भुत
कर्मणः ॥ २२ ॥ सर्वरत्नमयः श्रीमांस्त्रि
कूटो नाम पर्वतः ॥ सुतः पर्वतराजस्य
सुमेरोर्भास्करद्युतेः ॥ २३ ॥ क्षीरोदज
लवीच्युग्रैर्धौतामलशिलातलः ॥ उत्थि
तः सागरं भित्वा देवर्षिगणसेवितः

॥ २४ ॥ अप्सरोभिः परिवृतः श्रीमान्
प्रस्रवणाकुलः॥ गंधर्वैः किन्नरैर्यक्षैः सि
द्धचारणपन्नगैः ॥ २५ ॥ मृगैः सिंहैर्ग
जेंद्रैश्च वृत्तगात्रो विराजते ॥ पुन्नागैःक
र्णिकारैश्च सुबिल्वैर्दिव्यपाटलैः ॥ २६ ॥
चूतनिंबकदंबैश्च चंदनागरुचंपकैः॥ शा
लैस्तालैस्तमालैश्च तरुभिश्चार्जुनैस्तथा

मृगः शाखामृगः सिंहमर्दनश्च मदा

सचिवप्रवरोपास्यमानौ मन्त्रिवरौ नीतिशास्त्रानुगौ ॥

गः प्रस्तावज्ञः समंततः ॥२५॥ शांतमतां

वंतः समलंकृतः ॥ नानाधात्वंकितः सू

श्च सर्वगः ॥२८॥ एवं बहुविधैर्युक्तः स

कामः ॥ मंदारकुसुमश्चार्यः पारिजात

॥ २७ ॥ वक्त्रं: कंदर्पश्च सरलद्रुवदा

मदैः ॥ ३० ॥ जीवजीवकसंघुष्टं चको
राशिखिनादितम् ॥ तस्यैकं कांचनं शृंगं
सेव्यते यद्दिवाकरः ॥ ३१ ॥ नानापुष्प
समाकीर्णं नानाशृंगैः समाकुलम् ॥ द्वि
तीयं राजतं शृंगं सेव्यते यन्निशाकरः
॥ ३२ ॥ पांडुरांबुदसंकाशं तुषारचयस
न्निभम् ॥ वज्रेंद्रनीलवैडूर्यतेजोभिर्भा

सयन्नभः ॥ ३३ ॥ तृतीयं ब्रह्मसदनं
प्रकृष्टं शृंगमुत्तमम् ॥ पद्मरागसमप्रख्यं
तारागणसमन्वितम् ॥ ३४ ॥ नैतत्कृत
घ्नाः पश्यंति न नृशंसा न नास्तिकाः ॥
नातप्ततपसो लोके ये च पापकृतो ज
नाः ॥ ३५ ॥ नानाराधितगोविंदाः शै
लं पश्यंति मानवाः ॥ तस्य सानुमतःपृ

ग. ष्ठे सरः कांचनपंकजम् ॥ ३६ ॥ का मो.
८ रंडवसमाकीर्णं राजहंसोपशोभितम् ॥
मत्तभ्रमरसंघुष्टं चकोरशिखिनादितम्
॥ ३७ ॥ कमलोत्पलकह्लारपुंडरीकोप
शोभितम् ॥ कुमुदैः शतपत्रैश्च कांच
नैः समलंकृतम् ॥ ३८ ॥ पद्मैर्मरकतप्र ८
ख्यैः पुष्पैः कांचनसन्निभैः॥गुल्मैः की

चकवेणूनांसमंतात्परिवारितम्॥ ३९॥
अत्यद्भुतं महास्थानं विचित्रशिखराकु
लम् ॥ शतयोजनविस्तीर्णं शतयोज
नमायतम् ॥ ४० ॥ पंचयोजनमूर्धानं
सर एतत्समाणतः ॥ हिमखंडोदकं रा
जन् सुस्वादममृतोपमम् ॥ ४१ ॥ त्रैलो
क्येऽदृष्टपूर्वं च यत्तत्सरमनुत्तमम् ॥

सुप्रसन्नं सरो दिव्यं देवानामपि दुर्लभ
म् ॥ ४२ ॥ खातेन द्विगुणं प्रोक्तं शर
द्द्यौरिव निर्मलम् ॥ उपहाराय देवानां
सिद्धाद्यर्चितपंकजम् ॥ ४३ ॥ तस्मिन्स
रसि दुष्टात्मा विरूपोंऽतर्जलाशयः ॥
आसीद् ग्राहो गजेंद्राणां दुराधर्षो महा
बलः ॥ ४४ ॥ अथ दंतोज्वलमुखः क

दाचिद्गजयूथपः ॥ आजगाम तृषाक्रां
तः करेणुपरिवारितः ॥ ४५ ॥ मदस्रा
वी जलाकांक्षी पादचारीव पर्वतः ॥
वासयन्मदगंधेन महानैरावतोपमः
॥ ४६ ॥ गजो ह्यंजनसंकाशो मदाच्च
लितलोचनः ॥ तृषितः पानकामोऽय
मवतीर्णश्च तत्सरः ॥ ४७ ॥ पिबतस्त

ग. स्य तत्तोयं ग्राहश्च समपद्यत ॥ सुलीनः मो.
१० पंकजवने यूथमध्यगतः करी ॥ ४८ ॥
गृहीतस्तेन रौद्रेण ग्राहेणातिबलीय
सा ॥ पश्यंतीनां करेणूनां क्रोशंतीनां
सुदारुणम् ॥ ४९ ॥ नीयते पंकजवने
ग्राहेणाव्यक्तमूर्तिना ॥ गजो ह्याकर्षते १०
तीरं ग्राहश्चाकर्षते जलम् ॥५०॥ तयो

र्युद्धं महाघोरं दिव्यवर्षसहस्रकम् ॥ वा
रुणैः संयुतः पाशैर्निष्प्रयत्नगतिः कृतः
॥ ५१ ॥ वेष्ट्यमानः स घोरैस्तु पाशैर्ना
गो दृढैस्तथा ॥ विस्फूर्जितमहाशक्ति
र्विक्रोशंश्च महारवान् ॥५२॥ व्यथितः
स निरुत्साहो गृहीतो घोरकर्मणा ॥
परमापदमापन्नो मनसाचिंतयद्धरिम्

॥ ५३ ॥ स तु नागवरः श्रीमान्नाराय
णपरायणः ॥ तमेव शरणं देवं गतः स
र्वात्मना तदा ॥ ५४ ॥ एकाग्रो निगृ
हीतात्मा विशुद्धेनांतरात्मना ॥ नैक
जन्मांतराभ्यासाद्भक्तिमान् गरुडध्व
जे ॥ ५५ ॥ नान्यं देवं महादेवात् पू
जयामास केशवात् ॥ दिग्बाहुं स्वर्ग

मूर्धानं भूःपादं गगनोदरम्॥५६॥ आ
दित्यचंद्रनयनमनंतं विश्वतोमुखम् ॥
भूतात्मानं च मेघाभं शंखचक्रगदाध
रम् ॥ ५७ ॥ सहस्रशुभनामानमादि
देवमजं विभुम् ॥ संगृह्य पुष्कराग्रेण
कांचनं कमलोत्तमम् ॥ ५८ ॥ निवेद्य
मनसा ध्यात्वा पूजां कृत्वा जनार्दने ॥

आपद्विमोक्षमन्विच्छन् गजः स्तोत्रमु
दीरयत् ॥ ५९ ॥ गजेंद्र उवाच ॥ ॐन
मो मूलकृतये अजिताय महात्मने ॥
अनाश्रयाय देवाय निःस्पृहाय नमो
नमः ॥ ६० ॥ नम आद्याय बीजाय
आर्षेयाय प्रवर्तिने ॥ अनंताय च नै
काय अव्यक्ताय नमो नमः ॥ ६१ ॥

नमो गुह्याय गूढाय गुणाय गुणधर्मि
णे ॥ अतर्क्यायाप्रमेयाय अतुलाय न
मो नमः ॥ ६२॥ नमः शिवाय शांता
य निश्चयाय यशस्विने ॥ सनातनाय
पूर्वाय पुराणाय नमो नमः ॥६३॥ न
मो जगत्प्रतिष्ठाय गोविंदाय नमो न
मः ॥ नमो देवाधिदेवाय स्वभावाय न

मो नमः ॥ ६४ ॥ नमोऽस्तु पद्मनाभा
य सांख्ययोगोद्भवाय च ॥ विश्वेश्वराय
देवाय शिवाय हरये नमः ॥ ६५ ॥ न
मोऽस्तु तस्मै देवाय निर्गुणायगुणात्म
ने ॥ नारायणाय देवाय देवानां पतये
नमः ॥ ६६ ॥ नमो नमः कारणवाम
नाय नारायणायामितविक्रमाय ॥ श्री

शार्ङ्गचक्रासिगदाधराय नमोऽस्तु त
स्मै पुरुषोत्तमाय ॥ ६७ ॥ गुह्याय वेद
निलयाय महोदराय सिंहाय दैत्य
निधनाय चतुर्भुजाय ॥ ब्रह्मेंद्ररुद्रमुनि
चारणसंस्तुताय देवोत्तमाय वरदाय
नमोऽच्युताय ॥ ६८ ॥ नागेंद्रभोगश
यनासनसुप्रियाय गोक्षीरहेमशुकनी

लघनोपमाय ॥ पीतांबराय मधुकैटभ
नाशनाय विश्वाय चारुमुकुटाय नमो
ऽक्षराय ॥ ६९ ॥ नाभिप्रजातकमला
सनसंस्तुताय क्षीरोदकार्णवनिकेतय
शोधराय ॥ नानाविचित्रमुकुटांगदभू
षणाय योगेश्वराय विरजाय नमो वरा
य ॥ ७० ॥ भक्तिप्रियाय वरदीप्तिसुद

र्शनाय फुल्लारविंदविपुलायतलोचना
य ॥ देवेंद्रविघ्नशमनोद्यतपौरुषाय ना
रायणायवरदायनमोऽच्युताय॥७१॥
नारायणाय परलोकपरायणाय काला
य कालकमलायतलोचनाय ॥ रामा
य रावणविनाशकृतोद्यमाय धीराय
धीरतिलकाय नमो वराय ॥ ७२ ॥ प

द्मासनाय मणिकुंडलभूषणाय कंसांत
काय शिशुपालविनाशनाय ॥ गोवर्ध
नाय सुरशत्रुनिकृंतनाय दामोदराय
विरजाय नमो वराय ॥ ७३ ॥ ब्रह्मा य
नाय त्रिदशायनाय लोकैकनाथाय हि
तात्मकाय ॥ नारायणायार्तिविनाश
नाय महावराहाय नमस्करोमि॥७४॥

कूटस्थमव्यक्तमचिंत्यरूपं नारायणं
कारणमादिदेवम् ॥ युगांतशेषं पुरुषं
पुराणं तं वासुदेवं शरणं प्रपद्ये ॥ ७५ ॥
अदृश्यमच्छेद्यमनंतमव्ययं महर्षयो
ब्रह्ममयं सनातनम् ॥ विंदंति यं वै पु
रुषं पुरातनं तं वासुदेवं शरणं प्रपद्ये
॥ ७६ ॥ उत्तिष्ठतस्तस्य जलोरुकुक्षे

र्महावराहस्य महीं विदार्य ॥ विधुन्व
तो वेदमयं शरीरं लोकांतरस्थं मुनयो
गृणंति ॥ ७७ ॥ योगेश्वरं चारुविचित्र
मौलिं ज्ञेयं समस्तं प्रकृतेः परस्थम् ॥
क्षेत्रज्ञमात्मप्रभवं वरेण्यं तं वासुदेवं
शरणं प्रपद्ये ॥ ७८ ॥ कार्यक्रियाकार
णमप्रमेयं हिरण्यबाहुं वरपद्मनाभम् ॥

महाबलं वेदनिधिं सुरोत्तमं तं वासुदे
वं शरणं प्रपद्ये ॥ ७९ ॥ किरीटकेयूर
महार्हनिष्कैर्मण्युत्तमालंकृतसर्वगात्र
म् ॥ पीतांबरं कांचनचित्रनद्धमालाध
रं केशवमभ्युपैमि ॥ ८० ॥ भवोद्भवं
वेदविदां वरिष्ठं योगात्मकं सांख्यविदां
वरिष्ठम् ॥ आदित्यचंद्राग्निवसुप्रभावं

प्रभुं प्रपद्येऽच्युतमात्मवंतम् ॥ ८१ ॥ यदक्षरं ब्रह्म वदंति सर्वगं निशम्य य
न्मृत्युमुखात्प्रमुच्यते ॥ तमीश्वरं युक्त
मनुत्तमैर्गुणैः सनातनं लोकगुरुं नमा
मि ॥ ८२ ॥ नमस्तस्मै वराहाय लील
योद्धरते महीम् ॥ खुरमध्यगतो यस्य
मेरुः खुरखुरायते ॥ ८३ ॥ श्रीवत्सांकं म

हादेवं देवगुह्यमनूपमम् ॥ प्रपद्ये सूक्ष्म
मचलं वरेण्यमभयप्रदम् ॥ ८४ ॥ प्रभ
वं सर्वभूतानां निर्गुणं परमेश्वरम् ॥ प्र
पद्ये मुक्तसंगानां यतीनां परमां गति
म् ॥ ८५ ॥ प्रभवं तं गुणाध्यक्षमक्षरं
परमं पदम् ॥ शरण्यं शरणार्तानां प्रप
द्ये भक्तवत्सलम् ॥ ८६ ॥ त्रिविक्रमं त्रि

लोकेशं सर्वेषां प्रपितामहम् ॥ योगा
त्मानं महात्मानं प्रपद्येऽहं जनार्दनम्
॥ ८७ ॥ आदिदेवमजं विष्णुं व्यक्ताव्य
क्तं सनातनम् ॥ नारायमणीयांसं प्र
पद्ये ब्राह्मणप्रियम् ॥ ८८ ॥ अकूपाराय
देवाय नमः सर्वमहाद्युते ॥ प्रपद्ये देव दे
वेशमणीयांसमणोःसदा ॥ ८९ ॥ एकाय

लोकनाथाय परतः परमात्मने ॥ नमः
सहस्रशिरसे अनंताय नमो नमः ९०
तमेव परमं देवमृषयो वेदपारगाः ॥
कीर्तयंति च सर्वे वै ब्रह्मादीनां पराय
णम् ॥ ९१ ॥ नमस्ते पुंडरीकाक्ष भक्ता
नामभयंकर ॥ सुब्रह्मण्य नमस्तेऽस्तु
त्राहिमां शरणागतम् ॥ ९२ ॥ तावद्भव

ति मे दुःखं चिंता संसारसागरे ॥ याव
त्कमलपत्राक्षं न स्मरामि जनार्दनम्
॥ ९३ ॥ भीष्म उवाच ॥ भक्तिं तस्य
तु संचिंत्य नागस्यामोघसंस्तवात् ॥ प्री
तिमानभवद्राजंश्छुत्वा चक्रगदाधरः
॥ ९४ ॥ आरुह्य गरुडं विष्णुराजगाम
सुरोत्तमः ॥ सांनिध्यं कल्पयामास त

स्मिन् सरसि लोकधृक् ॥ ९५ ॥ ग्राह
ग्रस्तं गजेंद्रं चतंग्राहं च जलाशयात् ॥
उज्जहाराप्रमेयात्मा तरसा मधुसूदनः
॥ ९६ ॥ जलस्थं दारयामास ग्राहं चक्रे
ण माधवः ॥ मोचयामास नागेंद्रं पाशे
भ्यः शरणागतम् ॥ ९७ ॥ स हि देवल
शापेन हूहूर्गंधर्वसत्तमः ॥ ग्राहत्वमग

मत्कृष्णाद्वधं प्राप्य दिवं गतः ॥ इदम
प्यपरं गुह्यं राजन्पुण्यतमं शृणु ॥९८॥
युधिष्ठिर उवाच ॥ कथं शापोऽभवत्ता
वद्गंधर्वस्य महात्मनः ॥ एतदिच्छाम्य
हं श्रोतुं विस्तरेण पितामह ॥ ९९ ॥ भी
ष्म उवाच ॥ यथा तौ शापितौ तेन
देवलेन महात्मना ॥ हाहाहूहूरिति

ख्यातौ गीतवाद्यविशारदौ ॥ १०० ॥
उर्वशी मेनका रंभा तथान्ये चाप्सरो
गणाः ॥ शक्रस्य पुरतो राजन् नृत्यंते
ताः सुमध्यमाः ॥ १ ॥ ततस्तु तौ गा
यमानौ गंधर्वौ राजसद्मनि ॥ अन्यो
न्यं कुरुतः स्पर्धां शक्रस्य पुरतः स्थितौ
॥ २ ॥ आवयोरुभयोर्मध्ये यः श्रेष्ठो

गीतवाद्ययोः ॥ तं वदस्व सुरश्रेष्ठ ज्ञा
त्वा गीतस्य लक्षणम् ॥ ३ ॥ गंधर्वयोर्व
चः श्रुत्वा प्रत्युवाच शतक्रतुः ॥ युवयो
र्गीतवाद्येषु विशेषो नोपलभ्यते ॥ ४ ॥
एक एव मुनिश्रेष्ठो देवलो नाम नाम
तः ॥ युवयोः संशयच्छेत्ता भविष्यति
न संशयः ॥ ५ ॥ ततस्तु तौ शक्रवचो

निशम्य प्रणम्य राजन् शिरसा सुरो
त्तमम् ॥ गतौ सुहृष्टौ जयकांक्षिणौ
तौ यत्राश्रमे तिष्ठति स द्विजाग्र्यः॥६॥
ततो दृष्ट्वा मुनिश्रेष्ठं देवलं शंसितव्रतम्॥
अभिवाद्य महात्मानमूचतुः पार्श्वतः
स्थितौ ॥७॥ शक्रेण प्रेषितौ देव त्वत्स
मीपे द्विजोत्तम ॥ एकस्य नौ जयं देहि

यत्ते मनसि रोचते ॥ ८ ॥ पृथक् चरंतौ गायंतौ रुचिरं मधुराक्षरम् ॥ न किंचिद्वदते वाक्यं मुनिर्मौनस्य धारणात् ॥ ९ ॥ शृण्वन्नपि पदं तेषां न किंचिद्वदते मुनिः ॥ तदा तौ कुपितौ तस्य देवलस्य महात्मनः ॥ १० ॥ ऊचतुश्च रुषा वाक्यं गंधर्वौ कालचोदितौ ॥ मूढोऽयं

नाभिजानाति निश्चयं गीतवाद्ययोः
॥ ११ ॥ निशम्य तद्वचस्तेषां गंधर्वाणां
मदान्वितम् ॥ क्रोधादुत्थाय विप्रेंद्र इ
दं वचनमब्रवीत् ॥ १२ ॥ एष हूहूर्दुरा
त्मा तु ग्राहत्वं यातु मूढधीः ॥ त्वमेव
गजराजस्तु भवस्व गिरिगह्वरे ॥ १३ ॥
एवं शापं ददौ क्रुद्धो देवलः सुमहात

पाः ॥ ततस्तौ शापितौ तेन देवलेन म
हात्मना ॥ १४ ॥ प्रणम्य शिरसा वि
प्रं गंधर्वाविदमूचतुः ॥ भूमंडलगतौ ह्या
वां प्रसादं कुरु सुव्रत ॥ १५ ॥ निश्चयं
वद विप्रेंद्र येन शापाद्विमुच्यतः ॥ त
तस्तौ पुरुषौ दृष्ट्वा उभौ शापभयार्दि
तौ ॥ १६ ॥ प्रत्युवाच मुनिश्रेष्ठो गंध

र्वाणां भयापहम्॥ मेरुपृष्ठे सरो रम्यं
बहुवृक्षसमाकुलम्॥ १७॥ नानापक्षि
गणाढ्यं च द्वितीय इव सागरः ॥ त
स्मिन् सरोवरे रम्ये ग्राहो नित्यं भवि
ष्यसि॥ १८॥ तृषार्तस्तत्र मातंगो ग
मिष्यति नगोत्तमात्॥ तयोर्मध्ये म
हद्युद्धं भविष्यति सुदारुणम्॥ १९॥

ग्राहेणाकृष्यमाणस्तु गजः स्तोत्रं करि
ष्यति ॥ तदैव देवदेवेशस्तुष्यते नात्र
संशयः ॥ २० ॥ ततो नारायणः प्रीतः
शापात्त्वां मोचयिष्यति ॥ इत्युक्त्वा
ऋषिणा तेन वरेणैतौ प्रमोदितौ ॥ २१ ॥
ग्राहत्वमगमत्सोऽथ वधं प्राप्य दिवं ग
तः ॥ आपद्विमुक्तौ युगपद्गजो गंधर्व

एव च ॥ २२ ॥ गजाप मुक्ता यातः
श्रीकृष्णेन विमोक्षितः ॥ तस्माच्छापा
द्विनिर्मुक्तो गजो गंधर्व एव च ॥२३॥
तौ च स्वं स्वं वपुः प्राप्य प्रणिपत्य ज
नार्दनम् ॥ गजो गंधर्वराजश्च परां नि
र्वृतिमागतौ ॥ २४ ॥ प्रीतिमान् पुंडरी
काक्षः शरणागतवत्सलः ॥ अभवद्देवदे

वेशस्ताभ्यां चैव प्रपूजितः ॥ २५ ॥
भजंतं गजराजानमवदन्मधुसूदनः ॥
श्रीभगवानुवाच ॥ ये मां त्वां च सर
श्चैव ग्राहस्य च विदारणम् ॥२६॥ गुल्म
कीचकवेणूनां तं च शैलवरं तथा ॥ प्र
भासं भास्करं गंगां नैमिषारण्यपुष्कर
म ॥ २७ ॥ प्रयागं ब्रह्मतीर्थं च दंडका

रण्यमेव च ॥ ये स्मरिष्यंति मनुजाः
प्रयताः स्थिरबुद्धयः ॥ २८ ॥ दुःस्वप्नो
नश्यते तेषां सुस्वप्नश्च भविष्यति ॥ अ
निरुद्धं गजं ग्राहं वासुदेवं महाद्युतिम्
॥ २९ ॥ संकर्षणं महात्मानं प्रद्युम्नं च
तथैव च ॥ मत्स्यं कूर्मं वराहं च वामनं
तार्क्ष्यमेव च ॥ ३० ॥ नारसिंहं च ना

गेंद्रं सृष्टिप्रलयकारकम् ॥ विश्वरूपं हृ
षीकेशं गोविंदं मधुसूदनम् ॥ ३१ ॥
सहस्राक्षं चतुर्बाहुं मुरारिं गरुडध्वज
म् ॥ त्रिदशंत्वदितिंदेवंदृढभक्तिमनुत्त
मम् ॥ ३२ ॥ वैकुंठं दुष्टदमनं मुक्तिदं
मधुसूदनम्॥ एतानि प्रातरुत्थाय संस्म
रिष्यंति ये नराः ॥ ३३ ॥ सर्वपापैः प्रमु

च्यंते विष्णुलोकमवाप्नुयुः॥भीष्म उवा
च ॥ एवमुक्त्वा महाराज गजेंद्रं मधु
सूदनः॥ ३४॥ स्पर्शयामास हस्तेन ग
जं गंधर्वमेव च ॥ तौ च स्पृष्टौ ततः स
द्यो दिव्यमाल्यांबरावुभौ ॥ ३५॥ तमे
व मनसा प्राप्य जग्मतुस्त्रिदशालयम्॥
ततो दिव्यवपुर्भूत्वा हस्तिराट् परमं पद

म् ॥ ३६ ॥ गच्छति स्म महबाहो नारा
यणपरायणः ॥ ततो नारायणः श्रीमा
न्मोचयित्वा गजोत्तमम् ॥ ३७ ॥ ऋ
षिभिस्तूयमानोयवैर्देगुह्यपराक्षरैः ॥
ततः स भगवान्विष्णुर्दुर्विज्ञेयगतिः प्र
भुः ॥ ३८ ॥ शंखचक्रगदापाणिरंतर्धा
नं समाविशत् ॥ वैशंपायन उवाच ॥

गजेंद्रमोक्षणं श्रुत्वा कुंतीपुत्रो युधिष्ठि
रः ॥ ३९ ॥ भ्रातृभिः सहितः सम्यक्
ब्राह्मणैर्वेदपारगैः ॥ पूजयामास देवेशं
पार्श्वस्थं मधुसूदनम् ॥ ४० ॥ विस्मयो
त्फुल्लनयनः श्रुत्वा नागस्य मोक्षणम् ॥
ऋषयश्च महाभागाः सर्वे प्रांजलयः
स्थिताः ॥ ४१ ॥ अजं वरेण्यं वरपद्मना

भं महाबलं वेदनिधिं सुरोत्तमम् ॥ तं वेदगुह्यं पुरुषं पुराणं ववंदिरे वेदविदां वरिष्ठम् ॥ ४२ ॥ एतत्पुण्यं महाबाहो नराणां पुण्यकर्मणाम् ॥ दुःस्वप्नदर्शने घोरे श्रुत्वा पापैः प्रमुच्यते ॥ ४३ ॥ तस्मात्त्वं हि महाराज प्रपद्य शरणं हरिम् ॥ विमुक्तः सर्वपापेभ्यः प्राप्स्यसे परमं पद

म्॥४४॥ यदा महाग्राहगृहीतकातरं सु
पुष्पिते पद्मवने महाद्विपम्॥ विमोक्ष
यामास गजं जनार्दनो दुःस्वप्ननाशं
च सुखोदयं सदा॥ ४५॥ परं पराणां
परमं पवित्रं परेशमीशं सुरलोकनाथ
म्॥ सुरासुरैरर्चितपादपद्मं सनातनं लो
कगुरुं नमामि॥ ४६॥ वरगजशरणा

द्विमुक्तिहेतुं पुरुषवरं स्तुतिदिव्यदेहगी तम्॥सततमपि पठंति ये तु तेषामभिहि तमरणांतकिल्बिषापहं स्यात् ॥ ४७॥ दृढबद्धधर्ममूलो वेदस्कंधः पुराणशा खाढ्यः॥ क्रतुकुसुमो मोक्षफलो मधुसू दनपादपो जयति ॥ ४८ ॥ नमो ब्रह्म ण्यदेवाय गोब्राह्मणहिताय च ॥ जग

द्धिताय कृष्णाय गोविंदाय नमो नमः
॥ ४९ ॥ आकाशात्पतितं तोयं यथा ग
च्छति सागरम् ॥ सर्वदेवनमस्कारः के
शवं प्रति गच्छति ॥ ५० ॥ वेदे रामा
यणे चैव पुराणे भारते तथा ॥ आदौ
मध्येतथा चांतेहरिः सर्वत्र गीयते ॥५१
सर्वरत्नमयो मेरुः सर्वाश्चर्यमयं नभः ॥

सर्वतीर्थमयी गंगा सर्वदेवमयो हरिः ॥ ५२ ॥ गीता सहस्रनामैव स्तवराजो ह्यनुस्मृतिः ॥ गजेंद्रमोक्षणं चैव पंचरत्नानि भारते ॥ १५३ ॥ इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां शांतिपर्वणि भीष्मयुधिष्ठिरसंवादे गजेंद्रमोक्षः समाप्तः ॥ श्रीकृष्णार्पणमस्तु ॥

॥ इति गौदमोक्षः समाप्तः ॥

